१३ संभाषे स्त्रीशूद्रोच्छिष्टभाषणे। उच्छिष्टपुरुषं स्पृष्ट्वा भोज्यं चापि तथाविधं। आचामेदश्रुपाते च हासे हित्वा तथैव च। यथाहितं नाभिका
जलं। आग्नेयं गव्यमथ्यासं भस्म स्नानमपां तमेव च। स्त्रीणामथ्यान्मनः स्पर्शे नीवीं च परिधाय च। उपस्पृशेद्विशिष्टस्य कर्मणः प्रयतोऽपि सः
13 देवार्चनादिकार्येषु तथा गुरुभिवादनं कुर्वीत सम्यगाचम्य तद्वदेव भुजिक्रियां। तथा शातातपोक्तिः ॥ आचामेद्वर्जनेत्संमुखत्वात्
लचर्वणे। ॐ प्रविलोमके गृह्य वासो विपरिधाय च। अश्रुमेकं च मुक्त्वा वनिष्ठीव्य त्यक्त्वा तथानृते गत्वा श्मशानं चाक्रम्य आचामेद्ध्रम
यानादिपमरा अधौ वा पुरुषसमसर्गे आक्रन्दे क्रोधसंभवे। मार्जारमूषिकास्पर्शे प्रहासेऽनृतभाषणे। संदेहे च सर्वेषु शिखामोक्षे तथैव च। विना
विनायज्ञोपवीतेन नित्यमेव मनुपस्पृशेत् शुद्धस्पृशेदुच्चमेदिति। मत्स्यः। विष्णुपुराणेपि। चंडालादि स्पर्शे होमे स्पृष्ट्वा चामेद्धेनोनमाः श्वादी
स्पृष्ट्वा तथैव व्यापीति। अथ हिरण्यकेशीयकारिका॥ आत्तजलादिका च मुमेभोजने स्पृष्टाप सर्प्यलेच सूपरिधाने होमे दाने च वाण
प्रतिग्रहे हविर्भक्षणे अभ्यंगे संध्यायेन उपस्पृशेत यति ग्रहे स्पृष्ट्वा श्मशानलंघनाद्दिचामेत्। तदुक्तं पात्रवकोना आचामाचालु
तेषु मेधु लाद्यं स्पृश्याप मर्पणे। आचामेत् पुनराचामे द्वासोपि परिधाय च। वैद्याधापनादिभोजनेरहवनेदाने उपहार प्रतिग्रहे। हविर्भक्षणाका
लेनुत हित्वा वमनं वरेव्यान्तथा अस्नपराणे हामे भोजनकाले च संध्ययोरुभयोरपि आचान्तः पुनराचामेत् स्पृष्ट्वा मत्स्यमांसविदः
वमने अपवातादिपिडुष्टवः। तथाहि। हंतलस्पृष्टलेमलेपुरुषं संदेहावसिष्ठ कोतोपवलेहकुदंडे सोमसेवने मूत्रपुरीषोत्सर्गे निष्ठीवनेसु च परिधाने अश्रुपा रा.म. १३
ते नेवं सोमे। हंतलनेसंस्पर्शे च कृत्वाकलमूलेपु तृणकाष्ठमपेषु सुगंधद्रव्येषु आगार्यां गोपु स्वानिः सृतसेव्याविदष्ट्वा आगाने गोगायमतविद
शुद्धं तलस्याश्रुपेक्षणादमेदंतल दंतलग्ने जिह्वाभिस्पर्शने मधुपर्के सोमे उदके पुष्पलगाढ़तो अमृतापिधानमसी त्यादिषु आच्य होमे षु स्मा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रिक्तं उच्छिष्टं गण्डूषमात्रं ह्याचमनमात्रं वदन्ति तत्पुनः स्नानात्तेयेन । दंतलग्नं फलं मूलं भुक्तशेषं तु वासयेत् । तांबूले चेक्षुदंडे च नोच्छिष्टो भवति

द्विजः दंतवद्दंतलग्नेषु दंतवत्तेषु धारणा॥ अतस्तेषु तत्पुनराचामेत शौचं स्यान्नवशुचिः दंतवद्दंतलग्नेषु जिह्वास्पर्शे कृते न तु प

रिक्तात्प्रचस्यानात् त्रिर्गिरेन्नैव तत्शुचिः चंडालादीन् जपे होमे दृष्ट्वाचम्य विशुध्यति । रथ्यादेः स्पृष्ट्वापि वाचामेत् कर्णं वा दक्षिणं स्पृशेत्

जानुनोरध स्नात्वा रथ्यास्पर्शे चाचमनं कर्णस्पर्शो वान्यत्र स्नानविधानात् तथा आचारसागरे आपश्चैव यथा धुंजत्वाल अन्यातं

वह्नेर्वरुणस्य सोमस्य ... सर्वाणि नाभ्यामेत विशुद्धः णः क्षुतनिष्ठीवितसुप्तपरिधानेऽश्रुपातने । कर्मस्थ एषु नाचामेत् दक्षिणं श्रव

णं स्पृशेत्॥ ॥ ८ ॥ ॥ इति श्रीमन्नृसिंहचरणयुगलसरोरुहमधुकरनिर्विशेषमार्गप्रवर्तकसकलभूमंडलमण्डनसमस्त

यवनाधीश्वरनिजामसाहसमस्तसाम्राज्यधुरंधरश्रीमन्महाराजाधिराजश्रीदलपतिराजविरचिते श्रीनृसिंहप्रसादे आह्निकसारे आ

चमनविधिः॥ ९॥ अथ स्नानं तद्द्विविधं मुख्यममुख्यं च मुख्यं वारुणममुख्यं मांत्रं तत्र मुख्यं षड्विधं नित्यनैमित्तिकं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

आह्निक०
१४
14

कं काम्यं कर्माङ्गमलापकर्षकं क्रियाङ्गं चेति। अनुष्ठानमपि षड्विधं मान्त्रं भौमं आग्नेयं वायव्यं दिव्यं मानसं चेति तत्र नियतनिमित्तमावश्यकं नित्यं।

यथा प्रातर्मध्याह्नादिस्नानं नियतनिमित्तं नैमित्तिकं फलायेच्छया विहितं काम्यं कर्माङ्गं भूतं कर्माङ्गं अभ्युदयस्नानं मलापकर्षस्नानं। स्नान

मेव यत्र तीर्थे फलं तत् क्रियास्नानं। एवं स्नानं षट्प्रकारं। अनुष्ठानमप्येकधा मन्त्रस्नानं भौमं पार्थिवं। आतपवर्षेण। स्नानं दिव्यं विष्णुचिन्तनं मान

सं तत्स्मृतं भस्मस्नानमाग्नेयं गोरजसा वायव्यं दिव्यं तार्थं नुतुचरणोदकेनिःस्नायं

आपो हि ष्ठेति मन्त्रमयं॥

एम०
१५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मोऽत्रं तथा। विद्वत्सरस्वतीप्राप्तं सारस्वतं ब्राह्मणाः ह स्नास्यंततो यन्निष्पाद्यं ब्राह्मं स्मार्तमित्यादि सर्वमत्रैव विशदमिष्यते। तत्र वारुणस्नानस्य द्वैव
ध्यकारतां पाराशरे शंख आह। स्नानं तु द्विविधं प्रोक्तं गौणमुख्यप्रभेदतः। तयोस्तु वारुणं मुख्यं तत्पुनः षड्विधं प्रवेशात् तदुक्तं मात्स्ये पद्मपुराणे
। नित्यं नैमित्तिकं काम्यं क्रियांगं मलकर्षणं। क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्तितमिति। एतेषां लक्षणान्याह शंखः। अस्नातस्तु पुमा
न्नार्हो जपाग्निहवनादिषु प्रातःस्नानं तदर्थं तु नित्यस्नानं प्रकीर्तितं। चंडालशवयूपादिस्पृष्ट्वा स्नानं रजस्वलां। स्नानार्हस्तु यदा स्नाति स्नानं
नैमित्तिकं हितेः। पुष्यस्नानादिकं यत्तु दैवज्ञविधिचोदितं। तद्धि काम्यं समुद्दिष्टं नाकाम्यस्तु प्रयोजयेत्। जप्तुकामः पवित्राणि अर्चिष्य
न्देवताः पितॄंश्च स्नानं समाचरेद्यस्तु क्रियांगं तत्प्रकीर्तितं। अन्यच्च धर्मक्रियां कर्तुमनाः पूर्वं स्नानं समाचरेत्। क्रियांगं च समुद्दिष्टं
वेदशास्त्रपरैर्द्विजैः। मलापकर्षणं नाम स्नानमभ्यंगपूर्वकं। मलापकर्षणार्थाय प्रवृत्तिर्दृश्यते यतः इति। ननु प्रातःस्नानस्यैव नित्यत्वाभि
धानात् कथं माध्यंदिनस्यापि नित्यत्वमिति चेन्न प्रातःशब्दस्यातदुपलक्षकत्वात् अत एव माध्यंदिनस्यापि नित्यत्वमिति अत एवाविवेचित
विशेषमेव गोभिल उक्तवान् नित्यं सततं निर्वर्त्यमिति। अमुमेवार्थं स्पष्टयति व्याघ्रपादीयवचनं प्रातःस्नायी न वै नित्यं मध्यस्नायी सदा न
वेदिति नित्यशब्दवन्नित्यत्वप्रतिपादकस्य सदाशब्दस्य एकादश्यामिव चेव स्यामिवातः प्रातर्मध्यंदिनस्नाने नित्ये। तत्र स्नानानुष्ठानमौपम्यार्थं मंत्र
विधिरभिधीयते दृष्टार्थविहितकर्मफलस्य कर्मणो नानुष्ठेयत्वापत्तेः। ननु स्नानस्य जलस्यांगबहिःसंबंधात्मकस्य मलापनेनांगशुध्य
र्थत्वात्तत्र मंत्रविधेरदृष्टत्वापत्तेरनुपयोगि मंत्रविधानमिति चेन्न दृष्टार्थस्यापि कर्मणोऽस्नानमंत्रैरणाननुष्ठेयत्वाशात् तदुक्तं ज्ञात्वा
कर्म समारभेदिति तथा श्रुतिरपि यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति। अदृष्टार्थत्वस्यापि स्नानस्यांगीकाराशात्त
दुक्तं शंखेन। प्रातःस्नानं प्रशंसंति दृष्टादृष्टकरं हितमिति। तत्रादृष्टार्थत्वं यथाकथंचित्संलब्धमपि अदृष्टार्थत्वं तु मंत्रैरेवानुष्ठितमस्यादृष्टका
रि भवतीति नियमांगीकारेण स्नाने नैव विधिना कर्मनोऽनुष्ठेयत्वाशात् अन्यथा कर्मविध्यस्नानेऽनुष्ठानाप्रकेरशक्यं। तदुक्तं माधवीये

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मंत्रपूतेजीनेयेत्वाद्रूत्स्नानं फलप्रदं। नद्यथा परिमन्त्राणां यादसामिव निष्फलं। तथा अविदित्वैवयः स्नानविधानं स्नानमाचरेत् स याति
१५ नरकं घोरमिति धर्मप्रसधाररणा। विधिहृष्यंत्यय कर्मकरोत्यविधिनान्त्रयः। फलं न किंचिदाप्नोति क्लेशमात्रं हि तस्य तत्। मन्त्रपवित्रपमंडूका
15 स्नोपम आह्निकानिशं। वसंतोपि फलस्नानमुर्वंति न ते द्विजाः। विशाब्रह्मसत्रनिशं वैवमंत्रवत्स्नानमिष्यते। न स्नोमेव हि भद्रस्य स्नोलां वे वतथा
मवेश्वाइति नत्त्रुद्विजानां स्नानादे मंत्रविधिनैवानुष्ठानेपि प्रातस्नानस्य अमंत्रतैयेव विधानं मुक्तं। तदुक्तं कात्यायनेना पथास्त्रिनितथा प्रात
र्नित्यं स्नायात् नात्तुरः। दंतान्प्रक्षाल्य नद्यां सेगे रेवचतदमंत्रवद्दितिसत्यं। अमंत्रवदित्यनेन सर्वथा प्रातस्नाने मंत्रा निषिध्यंते किं तर्हि
मंत्रवद्गुचस्येव होमकालातिवर्त्तिनिया निषेध इति। तदुक्तं कात्यायनेना अत्यंचाद्धोमकालस्य वहुचास्नानकर्मणः। प्रातर्नतनुपास्ना
नं होमलोपो विगर्हित इति इदं च आपस्तंबानामेव संमतं माश्वलायनवाजसनेयिनां ते तु प्रातस्नानस्यापि यथोक्तमंत्रैरेवानुष्ठेयत्वा
भिधानाद्दनचिंर्वं होमकालातिपत्तिः नुषस्येव प्रातस्नानविधानाश्शतदुक्तं जावालेन। सततं प्रातरुत्थाय दंतधावनपूर्वकं। आचरेदु
षसि स्नानं तर्प्पयेद्देवमानुषमिति। लघोक्तं विष्णुस्मृतौ। प्रातस्नाय्यप्रणकरः पश्चात्प्राचीमवलोकस्नायात् इति। ततश्चदुषसि स्ना
नं हेषन्मंत्रोपेतमाध्यंदिनमकलमंत्रोपेतं इति आपस्तंबमतात् तदुक्तं स्मृतिचंद्रिकायां। प्रातस्नानं मंत्रवर्जं मध्याह्ने मांत्रिको विधिरि
ति। इतरेषां तु उषसि च पौदयेवा प्रातःस्नानविधानं तदुक्तं चिनुर्विंशतौ। उषस्युषसि यत्स्नानं संध्यायामुदिते पिवा। प्राजापत्येन तत्
तुल्यं सर्वपापप्रणाशनं इति। नन्वस्मृतिचंद्रिकाकारादिभिरिदं वाक्यमेवं व्याख्यातं। उदिते उदयाभिमुखे इति इदमनुपपन्नं अपि
वा शद्बानार्जवापत्तेः संध्यायानित्यप्रस्य वे यथापिनैश्चायदप्युक्तं वैतदन्यथा प्रातःसंध्यां सनक्षत्रामित्यनेन विरोधः स्यात् स्नाद राम०
स्नातस्य संध्याद्यनधिकारादिति न दायि विचारणीयं। अहोरात्रस्य यः संधिः सूर्यनक्षत्रवर्जितः। सानुसंध्या समाख्याता मुनिभिस्तत्त्व
दर्शिभिरिति रातह्युकपर्यालोचनया सूर्यनक्षत्रवर्जितसमये संध्यापामुपास्यत्वाभिधानशाप्रातःसंध्यां सनक्षत्रामित्येतत्स्ना १५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रंभपरं विज्ञायते अत्र च याम्यर्थेन स्नानवर्जितं इत्यनेन विरोधापत्तेः एतदुक्तं यल्लेखकाः प्रयोगपारिजातादयोऽपि विरलाः वेदितव्याः । किंच काल
मात्राग्राहिणां स्नानसंध्योत्तरमनुदिते होमिनां तिष्ठेदासूर्यदर्शनादित्यनेन न कश्चन विरोध इति विस्तरेण लब्धमनुवाय्याकर्षं च इत्यलं बहुवि
रोधेन तस्मात्प्रातःस्नानमपि मंत्रविधिनैवानुष्ठेयं नद्यादौ । तत्र महानद्यां नद्यां स्रोतसि सरसि देवखाते जले तथा च शृंगे धारायां यद्यपि च कर्तव्यं ।
व्यां समुद्रगामिनी पर्वतोद्भूता अंबुसंततिर्महानदीत्युच्यते मुख्यपर्वतादुद्भूता नानुदकसंततिर्महानदीत्युच्यते । पूर्वदिग्भागे पर्वतामलिल
संततिः पश्चिमसमुद्रगामी नद इत्युच्यते भुवः पर्वताद्युद्भूतेमे घरससंतानं यन्नदीं प्रविशति तत्स्वयं प्रबलाच्चलयं प्राप्नोति तत्स्रोत इत्युच्य
ते हृत्ताकारः सर्वदा जलयुक्तः स पंकजोत्सेकजलाशयः सर इत्युच्यते देवनिर्मितो जलाशयो देवखातं इति प्रसिद्धः । ग्रामार्थं धान्यार्थं च
मनुष्यैः क्रियमाणो नद्यादिप्रवाहः सजल इत्युच्यते । तथा कश्चन पर्वते प्रसिद्धः शृंगं च उच्चतरशिलानिर्वृद्धं स्रोयानमधो जलं । पर्व
तांतरणलाभिस्मरंती धारेत्युच्यते । कूपः प्रसिद्धः । तत्र नदीमहानदीनां च एवं फलतारतम्यं ज्ञातव्यं । नद्यः समुद्रगाः सर्वास्त्रिपवासफलप्रदाः
पक्षोपवासफलदा महानद्यः समुद्रगाः । मासोपवासफलदः सकृत् आविसरित्पतिः । अष्टोपवासफलदस्मानास्त्रतरतिगिरीमंदाकि
न्यर्थफलदा स्मृता गोदावरीमुखाः ॥ इति तत्त्वं दपुराणे ॥ तावरचत्तो महानद्यः सरस्वती सरयूर्यमुना जलद्रुतकन्या च नर्मदा । एतां च त्र
महानद्य इत्पाद्याभीमरथी गोदावरी नर्मदा तुंगभद्रा कावेरीति दशमहानद्यः पद्मपुराणे तु गोदावरीभीमरथी तुंगभद्रा च वेणिका तापी
पयोष्णी विंध्यस्य दक्षिणे तु प्रकीर्तिताः इति । लांतगिरयो नर्मदा च यमुना च मरस्वती । विशोका च वितस्ता च विंध्यस्योत्तरतः स्थिताः इ
ति ॥ वामनपुराणे तु । गोदावरी भीमरथी कृष्णा वेण्या सरस्वती तुंगभद्रा सुप्रयोगा सा सा कावेरी केवचा दुग्धोदा वलिनारे वावारिशी
ताकलखना इति ततो महानद्यादेशाल्मलीति त्रीणि निवकरं जहनाक को विदारक पि त्रुवदरीविभीतक सेलुखदिरछायां हि ते
रतजकतीर्थाधोरणोदकांतद्वीपांतराल स्थागतोदकप्रथमवेगजोदकाच्यम सोमितोदकतीर्थविनिर्गतोदकप्रत्यासत्त्योदक

आह्नि.कां.२ ष्यति॥ रजोदोषप्रहीणस्नायाश्च कृत्यादौ अत्र स्मृत्यर्थसारे अल्पजले भूर्यं चर्मपिंडान उद्धृत्य पुत्रजन्मविवाहग्रहरोगं विना न स्ना

१६ यात् तदुक्तं मरीचिना। अननुभूते पुनः स्नायात् तथैवासंस्कृते भुवि। आत्मीये यदि न स्नायात् तथैवाल्पजले भुवि चेति। वापीकूपतडागेषु

16 प्रतिष्ठावर्जितेष्वपि। न स्नायात् पुत्रजननविवाहग्रहरोगं विनेति। तथा गालवोऽपि। अन्यैरपि कृते कूपे सेतौ वा वाप्यादिके तथा। तत्र

स्नात्वा चाचम्य वा च प्रायश्चित्तं समाचरेत्। प्रायश्चित्ते तु स्नात्वा चाप्तं छं समाचरेदित्यर्थः। तदुक्तं देवयाज्ञं तथाह मनुः। अलाभे देवखातानां सर

सां सरितां तथा। उद्धृत्य चतुरः पिंडान् पारक्ये स्नानमाचरेदिति। रजोदुष्टास्तु नदी पुनः स्नायात्तत् तदुक्तं कात्यायनेन। कर्कटादौ रजोदु

ष्टा गोमती चन्द्रभागा सिन्धुश्च सरयूर्नर्मदा त्रिवामा दुष्टा तां गोरथी च न स्पृशं दुष्टा च तत्र र्थेह निभद्यो इति तदुक्तं पुराणे। आदौ कर्कटके देव

विसर्वा नद्यो रजस्वलाः त्रिदिनं च चतुर्थेऽह्नि शुद्धाः स्युर्जाह्नवीव यथेति। एवं सर्वत्र प्राप्ते क्वचिदपवादोऽप्यस्तीत्याह देवलः। गंगा च यमु

ना चैव प्लक्षजाता सरस्वती। रजसा नाभिभूयन्ते ये चान्ये नदसंज्ञकाः। कुरुक्षेत्रे या मारस्वती मालतज्जाता। नदे देवखातादावा

वेद्धृतानु दुर्तिर्वा जले ॐ नमो नारायणायेत्यष्टाक्षरेण मूलमंत्रेण तीर्थं कल्पयित्वा विष्णोः पादप्रसूतासि वैष्णवी विष्णुदेव

ता। त्राहि नस्त्वेनमस्मादाजन्ममरणांतिकादिभिस्तिस्त्रः कोट्यर्द्धकोटी च तीर्थानां वायुरब्रवीत् दिवि भुव्यंतरिक्षे च तानि मे सं

तु जाह्नवी। नंदिनी नलिनी सीतेत्याद्यादिमंत्रेण वा स्नानं कुर्यात् गृहे तत्तीर्थं न स्यादित्यादि गिरिकविषयं तदुक्तं देवलेन। नदीषु नदं

कूपास्वपर्वते न पर्वते। नाद्यां प्रशंसेत तत्रापि तीर्थायतनेषु च। एकां नदीं समासाद्य नान्यां स्नानेन दीं स्मरेत् यदि स्मरेत्तदा मद्यः तस्य

पुण्यं विनश्यतीति॥ ॥ यत्र स्नानं तामेव ध्यायन् आयादितितश्च। इदं च स्नानं नद्यादिषु आश्वलायनाय स्रोतःस्नानेन स्रोताभिमुखो ए४०

निमज्जेत् तथोक्तं पाराशरे। शंखेन। स्रोतसोऽभिमुखो मज्जेद्यत्रापः प्रवहंति वै। स्थावरेषु च तोयेषु आदित्याभिमुखस्तदे १६

ति। तथा। अप्रवाहोदके स्नानं विप्रपादाभिलेचनं। आदित्याभिमुखः कुर्यात् संध्यावंदनमेव चेति। स्मृतिसंग्रहे ब्रह्मा...मिमुखः

तस्मो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्नायात्तु मार्जने चाघमर्षणे। अन्यत्रार्कमुखो रात्रौ प्राङ्मुखोऽग्निमुखोऽपि वा। संध्यासु च सूर्यं संध्यायां स्नानं कुर्वीत यत्नतः। तथा अन्यो वाद्य
प्रवाहासु स्नायाद्दिनकरोन्मुख इति तथा जाबालिः। प्रवाहाभिमुखो मज्जेद्यत्रापां प्रवहं तिति। स्थावरेषु च सर्वेषु आदित्याभिमुखः सदेति॥
॥ तथा नृसिंहपुराणेऽपि॥ नद्यां सरस्सु च स्नायात् प्रतिस्रोतः स्थितो द्विजः। तडागादिषु तोयेषु प्रत्यर्कं स्नानमाचरेदिति। कात्यायनयाज्ञवल्म
मतानुसारि वाजसनेयिनां तु सूर्याभिमुखमेव मज्जनमभिमतं। तदुक्तं कात्यायनेन। आदित्याभिमुखो मङ्क्त्वा आपो अस्मानिति ऋचेति। ननु
प्रवाहाभिमुखो मज्जेदिति वाक्यं अन्यथा मज्जनविधं तदिति च यथा याज्ञवल्कीयानां तदभिमतमिति चेन्न। तस्य शाखान्तरविषयत्वात्। नन्वेका
त्यायनवचनस्य प्रवाहोदकविषयत्वं कुतो नाभ्युपगतमिति चेत्। कात्यायनवचनस्य प्रातःस्नाने नद्यादौ कर्तव्यमित्युपक्रमं कृत्वा सूर्यस्याभिमुखो
मज्जेच्चार्घ्यमर्घ्यादिनेऽपि चेति सामान्यरूपतयाभिधानात्। न हि सामान्यरूपतयाभिहितस्याविरलजलविशेषपरतया व्याख्यातुं शक्यं। ननु सामा
न्यस्यापि शब्दकाः शब्दैरादिविशेषोपसंहारो दृष्ट इति चेन्न सर्वत्र सामान्यं वै विशेषेणोपसंह्रियेत तदा न हि स्यात् सर्वभूतानीति सामान्यनिषेध
स्य ब्राह्मणो न हन्तव्य इति विशेषनिषेधोपसंहारे क्षत्रियादिवधे प्रायश्चित्तं न स्यात्। अतः शब्दैरादित्यत्र तु सामान्यस्य विशेषानुपसंहारेऽकेना
का इति विध्यपर्यवसानं स्यात् न च प्रकृते तद्दर्शितावनेवविधेः पर्यवसितत्वात्। अथ वा एवं स्रोतोभिमुखं स्नात्वा पश्चात्सूर्याभिमु
खो मज्जेदिति तदुक्तं पाराशरस्मृतौ। शंखेन रदं विशुद्धं जापि चानुप्रतिस्रोतो निमज्जति। आपो अस्मानिति स्मृचा भास्कराभिमुखः स्थित
इति। तदुक्तं स्रोतसोमुखः स्नायान्मार्जने चाघमर्षणे। अन्यत्रार्कमुखो रात्रौ प्राङ्मुखोऽग्निमुखोऽपि वा इति या। संध्यामुख सूर्य संध्यायां स्ना
नं कुर्वीत यत्नत इति। अर्थं हि वाक्यार्थः स्रोतसोभिमुखः स्नानं कुर्यात्। अन्यत्र अर्कमुखः स्नायात्। अन्यत्रेति विनियोगे मार्जनेऽघम
र्षणे चेति पूर्वं प्रवाहाभिमुखं निमज्जनं मार्जनादि सर्वं सूर्याभिमुखः कुर्यादित्यर्थः। यद्वा प्रवाहाभिमुखस्नानं प्रवाहोदकविषयं सू
र्याभिमुखस्नानं स्याविनजलविषयं इत्येवं व्यवस्था श्रीयेत तदा संध्यासु च सूर्यं संध्यायां स्नानं कुर्वीत यत्नतः। इति वाक्यं सूर्याभिमुख

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

आह्नि॰ कृ॰ २ तथास्नानं विदधत्प्रवाहाभिमुखस्नानविधायकापहृतविषयतयास्वविषये निःशंकमलभमानमतीवानुलंघ्य शार्वं स्वविधिमाकुलयेदतस्तत्र
सूर्याभिमुख एव निमज्जेत्॥ तदुक्तं जमदग्निना॥ अथ स्नानं प्रवक्ष्यामि सर्वपापप्रणाशनं। नात्योदकेन च स्नायान्नद्यां चाप्स्वप्यहं त्रिमोद्-
१७ त्याद्य स्नात्वा आदित्याभिमुखो मज्जेद्यो अस्मात्त्रिति न चामध्यंदिने य आचामेन्मंत्रेण यः पुनः चित्यभूमिमितिपदं तदुक्तं स्मृतिचंद्रिकाकारैः
17 आदित्याभिमुख इति स्थावरोदकविषयमिति इदमनुपपन्नं इतरत्वाख्यप्रदासेन नद्यासवेव स्नानस्योपयमाभिधाना शास्त्रसामान्यशास्त्रस्य च वि-
शेषोपसंहारकारणाभावात् तत्र स्नानं न द्याद्येकार्यं तदाह व्यासः। अभिषेकमुद्धृत्य पुण्यं ततः प्रसन्नं योगदक्षं। ततोपि सारं संमुखं तत्र स्नात्वा-
देयममृतमांतीर्थं तोयं ततः पुण्यं ततो गांगं नु सर्वतः॥ तथा मरीचिरपि अभिषेकमुद्धृत्यैवापि शीतम्बुस्समयापि गा। गांगं पयः पुनात्याशु पाप-
मामरणांतिकमिति तत्र स्नानार्थं गंगं स्वीयानि वतिलकर्माक्री चास्नानकाले गंगातः पात्रे जलमुद्धृत्य पादौ प्रक्षाल्य नदीसमीपं गत्वा आपोहि-
ष्ठेति मार्जनं कृत्वा देवपुरके निमज्ज्य संकल्पं कुर्यात्॥ तदुक्तं संग्रहकारेण। जलं देवगृहं चैव शयनं च द्विजालयं॥ निर्णिक्तपादः प्रविशेत्ता-
निर्णिक्तः कथं च नेति तत्र थावि घसम्नावुक्तं संकल्पपूर्वकं स्नानं कुर्याद्द्विजः समाहितः॥ तथा माडूं पुराणेपि॥ संकल्पं च यथा कुर्यात्स्ना-
नदानव्रतादिकां अन्यथा पुण्यकर्माणि निष्फलानि भवंति वै। असौ च संकल्पः स्नानात्पूर्वमेव कर्त्तव्यः॥ अथ नापुनः स्नानविधानात्तत दुक्तं
स्मृतिसंग्रहे छर्दिते मानसं कल्पेस्तुरकर्माणि मैथुने। दुःस्वप्ने दुर्जनस्पर्शे पट्ट स्नानं विधीयते इति। स्नानसंकल्पे स्नानार्थसंकल्पो तत्र स्ना-
नं न देतीरे एव कुर्यात्। अंतर्द्वीपे निषेधात् तथा हि भृगुणोक्तं। नेकुवामे नदीद्वीपे नांतरऽलेक्ष दावना भ्रातिस्मत्पादितंकर्म न कुर्याद् भृगुविः वचि-
श्रा अत्र त्याघ द्वीपं वृषभैकशतं प्रत्रगवां तिष्ठत्यसंशयः॥ तत्र द्भूमिगतं द्वीपमिति ब्रह्मविदो विदुरिति। अथ नद्यादिगमनाशक्तौ गृहे कर्त्तव्य-
स्नानविधानमुच्यते। तत्र क्रमः। गृहे गृहाभिमुखो भूत्वा गृहबहिःप्रदेशे सूर्याभिमुखो भूत्वा गृहबहिःप्रदेशे सूर्यमुखो भूत्वा तिलोद्दकं गमी त्रि-
त्रियो स्योद्दकं निशि यमनाः शीतेमंत्रसमारंभे मं अपलानमहं कुर्वे इत्यादिसंकल्पस्नानमध्ये मार्जनाचमनादि वहिः स्नानांगं वर्जयि-

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

चाभ्र द्रुहस्तस्नानं वर्जयेपि चाम्ना चार्द्रवस्त्रसहर्द्रमुत्सज्य अभुक्तां गंधं चा आचमनादि नु योरः । दुर्गंधं गन्धयपोशिष्टोन शीतोदकेन शी
तोष्णोदकेन गृहे स्नायाश्रमं च विधिं ववर्जयेदिति तथैव तत्राह हारीतः । गृहे गृह मुखं विंध्याद्यत्राभिमुखे रवौ । प्रवाहाभिमुखं कु
र्यां स्नानमेवं द्विजोत्तमः । शीतोदकं च दर्भैश्च पश्चादुष्णोदकं क्षिपेत् । स्नानमध्ये वाचमनं तर्पणं वस्त्रपीडनं । कूरपागनं तो वं
गृहे एतानि वर्जयेत् । गृहस्नानेन कुर्वीत तर्पणं मार्जनं तथा । चमनं कुर्यात् पश्चादाचमप्रभ ध्यति । आसनं रहितं स्नानं यास्नारोण
द्धृतः स्थिते । गृहे एतानि वर्ज्यानि सर्वदा द्विजसत्तमैः । स्नानं कृत्वार्द्रवस्त्रं च ऊर्ध्वमुत्तारयेद्द्विजः । आर्द्रमध्यमम् अथ स्नावेत्पुनः स्नाने
न तु धूयतीति । तथा तत्रैव गृहस्य परिशिष्टेन तु । न शीतोदकेन न शीतोष्णोदकेन गृहे स्नायाद्राश्रमं च विधिं वर्जयेच्छ्राव हि वीभुचादेशे सर्वे
पश्चात्कार्यं तत्र पानाशरे व्यासेन विशेषणतः । शीतास्त्वप्सु निषिच्योष्णामं च संतारसंभवाः । गृहे पि शस्यते स्नानं तद्धीनमफलं व
हिरिति । यत्तु केवलोष्णोदकविधानं अयमेव सदा पूतानां सां वाद्धिर्विशोधकः । ततः सर्वेषु कालेषु उष्णांतः पावनं स्मृतं । तथा आ
पः स्वभावतो मेध्याः किं पुनर्वह्निसंयुताः । तन संतः प्रशंसंति स्नानमुष्णेन वारिणेति । तदातुरविषयमित्यवगंतव्यं । कथं तर्हि आचा
र्यानुष्णोदकस्नानं कुर्वीणा हव्यं नेसत्यं शीततलोदकेनुष्णोदकप्रक्षेपेण विधानात् । तदाह भगवान्व्यासः शीतास्त्वप्सु निषिच्यो
ष्णामं च संतारसंभृताः । गृहेपि शस्यते स्नानं तद्धीनमफलं विदुरिति । आशक्यपते निवविधानात् । तदुक्तं यमस्मृतौ । आदित्य
किरणैः पूतं पुनः पूतं च वह्निना । आम्नातमातुरस्नाने प्रशस्तं तु शृतोदकं । शृतोदकमुष्णोदकमपि दपिमनुः । मृते जन्मनि संक्रांतौ
श्राद्धे जन्मदिने तथा । अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा । तथा पारस्कल्पवः । वृथा न उष्णोदकस्नानमिति । तथा । पौर्ण
मास्यां तथा दर्शे यः स्नायादुष्णवारिणा । स गोहत्याकृतं पापं संप्राप्नोति न संशयः । अमावास्यां रवेर्वारे संक्रांतौ राहुदर्शने । उष्णो
दकेन चैव स्नायाद्धुमित्रकुलक्षयः । सप्तम्यां तातु वारे च संक्रांतौ राहुदर्शने । आरोग्यपुत्रमित्रार्थी न स्नायादुष्णवारिणा । तस्मा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

आह्निक.२

वेमनानुरस्य नद्यादिसद्भावविषयं तेयां । नद्यल्लावेऽङ्ग्लोदके नैव स्नानविधानात् तदुक्तं यमस्मृतौ । नत्यं नैमित्तिकं चैव त्रियांगं मलकर्षणं
१८ । तीर्थाभावे तु कर्तव्यमुष्णोदकपरोदकैः ॥ तदुक्तं वैद्यकग्रंथे । नुष्णांबुना यः कामस्य परिषेको बलावहः ॥ तनैव जत्रूर्ध्वमांगस्य बलकृ
18 द्गाक्केशचक्षुषां । तच्चापयशक्तस्य कंठस्नानं विशिरस्कं स्वेशाद्यानाशक्तस्य कर्मस्विति । एतत्स्नानं कस्य कर्तव्यमि । इति वेदिछं प्रा
तर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः । यतेस्त्रिषवणं स्नानं सकृत्तु ब्रह्मचारिण इति । ब्रह्मचारिणस्त्वशक्तविषयं । तदुक्तं या
शवल्केनाम्नायात्प्रातर्मध्याह्ने ब्रह्मचारित याग्रहोति । अथवासर्वैरपि सकृदपि स्नानं अशक्तौ उदकाभावे च कर्तव्यमित
दुक्तं सर्वेवापि सकृत् कुर्युरशक्तौ चोदकं विना । सामर्थ्ये चावसज्ञेयथाशास्त्रं हितद्वेदिति । तत्र जीवत्पितृकस्य स्नाननिषे
धः । क्वचिद् दृश्यते । तथोक्तं स्मृतिरत्नावल्यां । दर्शे स्नानं न कुर्वीत मातापित्रोः सजीवयोः । कुर्वंस्तत्र निरयं चैति पित्रोर्दूषति जीवत
इति । काम्यनैमित्तिकं तु कर्तव्यमेव तथा पाराशरस्मृतौ । दर्शे स्नानं न कुर्वीत मातापित्रोः सजीवयोः । नवम्यां तावरे त त्रकाम्यं नै
मित्तिकं विनेति । अथ क्वचित्सर्वेषामपि निषेधो मनुस्मृतावुक्तः । न स्नायादुत्सवेतीते मांगल्यं विनिवर्त्य च । अनुव्रज्य सुहृत्सर्वं ध्वज्ञ
अर्चयित्वेष्टदेवताः ॥ तथा याज्ञवल्क्यः । नाञ्जलिप्रोनवासोभ्याम न व्रज्य चबांधवान् राग्रहमागत्य न स्नायात्र महानिशि नानुरं ना
थनैमित्तिके स्नायात् आचर्य पितेष्टदेवतां । अनुव्रज्य सुहृत्सर्वं ध्वजनिवर्त्योत्सवमंगले । तत्र कश्चिच्छास्मृतिरूपेण स्नानप्रकार उच्य
ते ॥ तत्र यात्तवल्क्यः ॥ तचापामति मंत्रेण वात्रुणेन तटे स्थितः । उदुत्तममिति सम्यचाघवती यजलाशयेत् । ततः स्तुमिति यानि इत्य
पः ॥ क्षिदुमित्रियास्तु वाहिर्नियेष्वादुमित्रियान इति च र्षे दुंमंत्रं यचासिपेदधः । पश्चात् दुक्तोत्तरं इदं तु क्षिपेद् दूर्निलतल्लया । तद्य द एम०
पीं कूं पंदमे ध्यं पदशांत अकिंचनं । आसां चमलिनं यद्वत सर्वमयग छमुग्रहोतो । तेन मंत्रेण तोयं सव्येन पाणिना । प्रक्षिपेद्दृशि ते १८
न्स्योपक्तो हस्त्रनयेस्मृतं । ततस्तीर्थमावाह्य आपो अस्मात्निति सम्चा भास्कराभिमुखः स्थितः ॥ इदं विष्णुर्जपि चानुप्रतिष्ठो तेनि म

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ज्जति। पुनराचमनं कृत्वा अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः॥ त्वं यज्ञस्त्वं वषट्कार आपो ज्योती रसोमृतमिति ततश्च मार्जनं कुर्यात् आपो
हिष्ठा मयोभुवः॥ इदमापः प्रवहतः व्याहृतीभिस्त्रयैव च। ततोभिमंत्र्य तत्तोयं मापोहिष्ठादिमंत्रकैः॥ अंतर्जलगतो मग्नो जपेत्त्रिरघमर्ष
णं॥ ॥आचमने विशेषः॥ जान्वोरन्तर्हस्तं यावामेजेतेतिष्ठन् शुचिर्भवेत्। आसीनस्तु तथा चामेद्गच्छन्कुर्याप्पिनार्भुवि स्थिति। त
द्रुपदां त्रिपदां वाच अघमर्षणं श्रीमन्नारायणं देवं स्मृत्वा अंगुष्ठांगुलिभिः श्रोत्र नेत्र द्वारा नासिकामुखं पीडयेति स्मृत्वा जले
त्रिरघमर्षणं कृत्वा वा ऋतमं त्रेरमं मेवतु एणं इति सचं न अभिषिंच्य अक्लिष्ट गौर्मंत्रैर्दमैः पाव यि चादेव ऋषिपितॄन् तर्पयेत्। तत्रायं क्र
मः॥ द्वौ हस्तौ युग्मतः कृत्वा पूरयेदुदकांजलिं। गोशृंगमात्रमुद्धृत्य जलमध्ये जले क्षिपेत्॥ अत्र यद्वकृते प्याम पयेतानु लास्यामपि
हस्तास्यां नुदकं यः प्रयच्छति समूढो नरकं याति। तीर्थं तत्र दुर्विषयं। तदुक्तं। प्रातर्द्विग्राहकाले च पाणिने कैनदीपते। तर्पणे स्य येने
वविधिरेषः पुरातन इति॥ ॥आश्वलायनानां स्नानप्रकारः॥ ॥प्रणवगायत्र्या बद्धशिखः पवित्रपाणिः समाहितः सन्नरान्त्रिय।
श्चिमे सध्यार्वदनात्मयममेवतांग्रत्यं भूमिस्पर्शं लागोमयं गृहीत्वा नद्यादि समीपं गत्वा उद्धृतजलैर्वा मुखं पाणिं चरणौ प्रक्षाल्यादि
चिणिनिंबकरंजशाल्मलीवदरीकपित्थकोविदारहरीतकविभीतकखादिरादिछायारहितरजकतीर्थाधोवर्णोदकापत्तोभितयए
हृतोदकान्तेर्वैदिकव्यतिनिक्तस्थले आदम्पलौकिकवार्तामकुर्वन् आपोहिष्ठादिसूक्तेनात्मानं संमार्ज्य दर्ध्व आनम्य चाप्राणाना
यस्य देशकालादि संकीर्तनपुरस्सरं अहं ममोपात्तप्रत्ययवार्यायतारप्रणालिकया श्रीपरमपुरुषः श्रीलक्ष्मीकान्तप्रीतये श्रीमद्ध्व
त्रीनृसिंहप्रेरणया स्नानमहं करिष्ये इति संकल्प्य स्वबीजानं गोमयमादाय वामहस्ते धृत्वा गत्तसंस्थं ॐ मामितिद त्रिणभागं ॐ
मन्त्र इति मध्यमभागं ॐ स्वाहा ॐ तरतां गं एवं समं त्रेधा विभज्य दक्षिणेन ग्राम्यं किंचित्किंचिद्गृहीत्वा प्राच्यादि दशदिक्षु मला
वेनमंत्राहृत्या हि ग्लावेनतरतां गं स्नानतीर्थे क्षिपेत् मध्यमलागंमानस्तोकं इति मंत्रेणाभिमंत्र्य गंधद्वारामिति मंत्रेण हत्वा मल

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

आह्निकका० काद्यवरणांतं सर्वांगमनुलिप्य कृतांजलिनुदुत्तममिति मंत्रेण जलेव रुणमावाह्याहिरण्यवर्णं वरुणं प्रपद्ये तीर्थं मे देहि याचितः।
यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः। यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतं तन्न इंद्रो वरुणो बृहस्पतिः सविता च पु
१२९ 19 नः पुनरिति मंत्राभ्यां अवते हेलउदुत्यं प्रसर्जस्वेति सप्ताभ्यां पाः प्रतनोनिवत उदुत्तमं व्येत यातीर्थमभिमन्त्र्याव्याहृतिपूर्वं च स्वमा
जेपि चाघवयोयत्य धुमिभीत्पुष्टमिणपे हिष्ठेतिवचनमभि: अंगुष्ठेन दमंगांगे हृत्य चान्त्रि: प्रदक्षिणामालोड्य प्रक्षाल्य च मन्त्रो
घमर्षणसूक्तं त्रिरावर्त्य मिमज्योन्मज्य सप्तमं वालोमहृदश कृत्य आकृष्य पाणिभ्यां शंखमुद्रया योनिमुद्रया योनिमुद्रया च जलेन
हीघामर्द्दं चाभर्द्दं मुखे वाहू हस्तिः आत्मनो गायत्र्या मंत्रेणाभिषेकं कृत्वा चात्रो अग्नेवरुणस्य विद्वानिति द्वाभ्यां तरत्स मंदधीधाव
तीति वसत्केन पुनः स्नात्वात्मानमभिषिच्यं तद्विष्णोः परमं पदमिति अग्नेरप्सा स्वायत्तं वेदं वरुणरिच्छ्ये जन इति त्पेतास्त्र जपिचा
सात्रेतोदके तु पवित्रीतिष्ठ्य द्युलोदेवतीर्थेन व्यस्तसमस्ताभिर्व्याहृतिभिः ब्रह्मादीन्देवान् संतर्प्य चाउपवीतिउदङ्मुखः सपवोदकैः
प्राजापत्यतीर्थेन व्याहृतिभिर्न्त्रषीं स्तर्पयित्वा प्राचीनावीतीदक्षिणाभिमुखस्य: पितृतीर्थेन सतिलोदकैर्व्याहृतिभिरव्यसोमः पि
तृमान्यमोंगिरस्वानग्निः कव्यवाहनरत्यादी स्त्रीरुत्रोश तर्पयित्वा तीरप्राप्य दक्षिणाभिमुखः प्राचीनावीति ये के चास्मत्कुले जाता
इति वस्त्रं निष्पीड्य उपवीत्यद्य पस्पृश्य परिधानीयमभ्युक्ष्य परिधाय द्विराचम्य तरीयकं अभ्युक्षितं प्रावृत्य द्विराचामेत्॥ तदाह शौन
नकः॥ अथ स्नानविधिं वक्ष्ये शौनकोहं द्विजन्मनां॥ समुद्रगां नदीं वा। पितगंकं सरसीम वा॥ गत्वा समाचरे आनं प्रयतो यी समाहि
तः॥ प्रसं जपेत्सहस्र सकमघर्षेणात्रणं जयेणा या स्तव द्धी या नांचा जसनेवि नां स्नानप्रकारः॥ ॥ स्नानाधिकरणाविहित कृत्रिमः १२०
कृत्रिमजलः मदादि प्रक्षालितयाणिचरणः प्रणव गायत्र्या वद्धशिखः त्रिसृजनवर्तं शुक्लब्रह्मग्रंथियुक्तं यज्ञोपवीतीत्रिप्रभृ
तिदर्भलव रचितपवित्रदक्षिणहस्तः अनंतगर्भसमाग्र प्रादेशमात्रसमेदलद्वयात्मकपवित्रांतं कृतदक्षिणहस्तो वा वक्तृशोय ग्रहा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

न्वितसव्यहस्तः एवं वस्त्रादि निर्णेजनादि विवर्जितः छायातीर्थस्थितः शुचौ देशे दूर्वांकुरं शंखं कुशानमादाय क्षितितारवत् कृत्वा षट्त्रिंशत्सर्ष
पान् मृदं गोमयं गंधं ओषधीः गोमूत्रं भूमिः क्षेत्रमंतरिक्षमनि षंवा गोमयं पंचगव्यादि तत्र सप्त मृत्तिका यदमीषां षट्पंचाशत्कृत्वः पंचाशत्तिलादिशा
तपत्रादि कुसुमान्यादाय यथोक्तं तीर्थे संस्थाप्य यथाशास्त्रमाचमनं कृत्वा अथ देशे तीर्थे तितो याभिमंत्रणं कृत्वा ओं नमः शिवायेति अ
नयर्चा पानीयमुद्धृत्य अभिमुखीकृत्य एते शतभित्यनया शतवारं दक्षिणहस्तेन प्रदक्षिणं सहस्रावर्तयेत् आलोड्य शनैः ततः क्षेत्रमृत्तिका
न हस्तपादौ जलेन नारायणं पठित्वा इति दर्भं प्रोक्षितं चेत् हुत्वा लावेका मन्त्रोधमदमणादिलप्रपंचात्मकारिवर्गमनस्य लिधाय निषिचेत् शनैः ततः
शिवस्तत्रजं घेचरणौ कर्णौ हृदि भित्तिः प्रक्षाल्य कटिनाभेः पश्चात्स्वकंठस्य समंतात् अधोभागं मलिगुदमेढ्रयोरंतरालं कुक्षिं स्नि
ग्धितोत्स्थलात्रजानु पर्यंतं जंघे जानुनोरधस्तात्गुल्फपर्यंतं पादौ गुल्फयोरधस्तात् अधिकारेण शिवं धारयेत् अंते वहि गुल्फावधि
सव्यहस्तं गृहीत्वा मृत्तिकां करिमालभ्य प्रक्षालनं तामर्पयामि सर्वत्र दद्यात् प्रक्षाल्य एवं द्वितीयं च तृतीयं कटिं प्रक्षाल्य एवमेव एकैकं
शोचयित्वा प्रथमं तेन प्रक्षाल्य यथाशास्त्रं पुनराचमनं कृत्वा नदकायनमस्तिन्दकं प्रणामं कृत्वा रवि पश्येत ध्यायेत चोदक्षीरणंगृहीत
मृदामुखमारभ्य नासिकापर्यंतानि नाभ्यादिपादपर्यंतानि अंगान्यनुलिंपेत् ततः सूर्याभिमुखो निमज्जेन्नाभिमात्रोदके शनैरेव जलं
प्रविश्य शिरसा जलमवगाह्य पश्चादापो अस्मान् इति मंत्रेण लालाटादिताभ्यः इति मंत्रेण उन्मज्य पुनर्निमज्य स्नात्वा आचम्य यथा
वच्छास्त्रानंतरं कृत्वा गोमयेन विलिप्य मानस्तोक इत्यचा दक्षिणहस्तेन गृहीत्वा तेन गोमयेन मूर्धप्रभृतिनाभिपर्यंतं वामहस्तगृहीतेन
नाभितः पादपर्यंतं इमं मेवरुणेति वरुणमभिसरीरमनुलिप्य स्नात्वा ततः इमं मेगंगे इति मंत्रेण प्रतिमंत्रं मूर्ध्नि निमज्जेत् ततः आ
चम्य ततो दर्भैः त्रिभिः कुशस्तंभैः दक्षिणहस्तेनापांतः प्रदक्षिणं त्रिर्नाभिमारभ्य ओंकारेण व्याहृतिभिर्गायत्र्या आपोहिष्ठेति ति
सृभिः आर्यगोरितिवतमभि आपो देवीर्हविष्मती देवीरापः इति द्वाभ्यां आपोदेवा इति द्रुपदादिवेत्यादिका वारुणी ऋचा इत्यनेन

मेति सूक्तेन मनः प्रणवेन व्याहृतिर्गायत्र्याचपावपि वाऽते सर्वं चेति सूक्तं अनुष्टुभः सशान्तिः पवित्राप्रणवं वा जपित्वा विष्णुस्मरणं शुद्धं

२० वाउक्तप्रकारेण देवऋषिपितृतर्पणं कृत्वा येशान्तयो ॐ योगयाज्ञवल्क्येन ॥ ह्यवालेकानमीमांसकानिः पवेद् घमर्षणं ॥ यथाश्वमेधावभृथ एवं

२० तन्मन्त्रजीवी त्रिपदानाम गायत्रीयजुर्वेदप्रतिष्ठिता ॥ अन्तर्जले त्रिराहत्य मुच्यते ब्रह्महत्यया ॥ व्यासोपि त्रिपदानाम गायत्रीवेदवाजसने

पकोऽसहस्रं तं तर्जले जप्त्वा ब्रह्महत्यां व्यपोहति ॥ संयतेनुसन्ध्याहृत्रिकां गायत्रीं प्रणवेन जपेच्छ्रद्धा पात्राल्लपा तं देवं सर्वपापप्रशान्तये स्वत्य

णीवेडकं ॥ यथाश्वमेधक्रतुराट्सर्वपापापनोदनः ॥ तथाघमर्षणं सूक्तं सर्वपापप्रणाशनं ॥ तथा याज्ञवल्क्यः ॥ अपःपाणौ समादाय त्रिःप

ठेत्रिपदामृचं ॥ तन्त्रो येन मुहूर्तं पि न्यस्य सर्वपापैः प्रमुच्यते ॥ ॐकारेण व्याहृतिभिर्गायत्र्यानुसमाहितः ॥ आपोहिष्ठेति च त्वजीरंस्यभिषेकं

यथाक्रमं ॥ अथापरोपासनाविधिप्रकारः ॥ ॥ सूर्योदयात्प्रागेव सप्रणवगायत्र्या शिखां बध्वा पाणौ पवित्रे विधाय समाहितः

सन्नद्धतशौचाचमनं दन्तधावनाचमनः मुकुटं मन्त्रमानीय प्रक्षालितमुखपाणिचरणः प्राणानायम्य विष्णुक्रमागेणाति ध्यादिस्मरणं

कृ चामन्त्रिकं त्रिधा विलम्ब्य एकलागेन ललाटं सहृदय हृदय पृष्ठोदर कुक्षि ऊरु पत्रक्ष णा बस्या नाभिं दक्षिणपाणिनापरिमार्ज्य ततो

वामपाणिनाच नाभिवस्त्र ऊर्जंघा चरणौ च प्रदक्षिणादिक्रमेण त्रिवारं परिमार्ज्य ततस्तृतीयमार्गेण त्रिः कृत्वा परिमार्ज्य हृत्सो मन्त्रदास्त्रा

नं कृत्वा आचमनं कृत्वा जलं प्रविश्य नाभिमात्रे जले गत्वा हृदिधा केशान्हृत्वा करौ नासिकां च निरुध्य त्रिरुन्मज्जनं कृत्वा हृदि राचम्य ॐ नमो

नारायणायेत्यष्टाक्षरेण व्याहृतिभिर्वा आपोहिष्ठेति सूक्तेन यच्चिदं वेदमिति वा इदमापः शिवेति जलमावर्त्य स्नात्वा चाजं रक्षायेति मन्त्रेणास्त

ते स्वतिमावद्धत्तेन वामहस्तपापापनुत्तये द्वादशवारं त्रिवारं वा जले जपित्वा त्रिवारं निमज्ज्य ततस्तर्पणं कुर्यात् ततः गोष्ठं गमात्रमुद्धृत्य राम०

त्रिर्द्दिधा दत्त स्नानांगमेव ॥ ॥ अथ सर्वेषां साधारणस्नानप्रकारः ॥ ॥ महादुर्गोमयदूर्वा आनीय हस्तौ पादौ च प्रक्षाल्य स्म चोकारं

व गायत्रीं निबद्धो या च्छिखां तत इतिशिखां बध्वा आचम्य हस्तयवाऽहस्तं धारं संस्पृश्य पञ्च दैकया शिरः प्रक्षाल्य छृत्यां नाभे स्तना य

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रि। अथ स्वस्तिभिः कायात्पद्भिः पादौ तथैव च। शिरः प्रभृति पादान्तं सर्वमात्मानं प्रक्षाल्य यथाविधि आचमनं कृत्वा सर्वमङ्गं संमार्जयेच्छ
तन्त्रमद्रोमपदूर्वामन्त्राः॥ ॥अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे। उद्धृतासि वराहेण कृष्णेन शतबाहुना। मृत्तिके चांघमद्गामि
प्रजपावधनेन च। मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिमन्त्रिता। मृत्तिके जहि नः सर्वं यन्मया दुष्कृतं कृतं। मृत्तिके देहि मे पुष्टिं त्वयि स
र्वं प्रतिष्ठितं। ततश्च गोमयेनैव मयमयथ्येति वुवश्च। अग्रमग्रं चरन्तीनामोषधीनां रसं वने। तासामृषभपत्नीनां पवित्रं कायशोधनं।
तन्मे रोगांश्च शोकांश्च नुद गोमय सर्वदा। ततो दूर्वया तत्रायं मन्त्राः॥ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि। एवा नो दूर्वे प्रतनु
सहस्रेण शतेन च। या शतेन प्रतनोषि सहस्रेण विरोहसि। इत्यादिमन्त्रैर्मार्जनं कृत्वा ततः रुहते देवी रमतमित्यादिमन्त्रैर्मार्जनं कृ
त्वा ततः इह तेदेवी रमन्तामित्यादिमन्त्रैरमन्तीकृत्य ऐनेशानमिति द्वाभ्यां तीर्थान्यावाह्य कुरुक्षेत्रादीन्यावाह्य ततो महाव्याहृति
भिर्गायत्र्या च अभिमन्त्र्य ततः आपो हि ष्ठेद मापद्रुपदादिवत्स्वापि। तत्र हिरण्यवर्णाभिः पावमानीभिरन्ततः इत्यादिभि स्वस्तिभि
रीस्य अन्तर्जले निमज्ज्य प्राणायामान् कृत्वा गायत्रीमघमर्षणं जपन्देवादीन्स्तर्पयेत्। अथ स्नानमन्त्रे पतः स्नानप्रकाराः॥ ॥यात्र
वल्कः॥ एव विस्तरतः प्रोक्तः स्नानस्य विधिरुत्तमः। असामर्थ्यान्नकुर्याच्चेत्तत्रायं विधिरुच्यते। स्नानमन्तर्जले चैव मार्जनाचमने त
था। जलाभिमन्त्रणं चैव तीर्थस्य परिकल्पनं। सत्सुप्रकारोऽमनुपुराणोदर्शितस्तथापि हि। दर्भपाणिस्तु विधिना आचान्तः प्रयतः शु
चिः। तीर्थं प्रकल्पयेद्विद्वान्मूलमन्त्रेण मन्त्रवित्। ॥ॐ नमो नारायणायेति मूलमन्त्रः॥ चतुर्हस्तसमायुक्तं चतुरस्रं समन्ततः॥
प्रकल्प्यावाहयेद्गङ्गामेभिर्मन्त्रैर्विचक्षणः॥ विष्णुपादप्रसूतासि वैष्णवी विष्णुदेवता॥ त्राहि नस्त्वेनसस्तस्मादाजन्ममरणान्तिका
त्। तिस्रः कोट्योऽर्धकोटी च तीर्थानां वायुरब्रवीत्। दिवि भुव्यन्तरिक्षे च तानि ते सन्तु जाह्नवी॥ तं गावार्म॥ नन्दिनी नलिनी सीता मालि
नी च महापगा॥ विष्णुपादाब्जसम्भूता गङ्गा त्रिपथगामिनी। भागीरथी भोगवती जाह्नवी त्रिदशेश्वरी। द्वादशैतानि नामानि यत्र

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

आह्निक २

२१ यत्र जलाशये। स्नातो यतः स्मरेत्त्रिर्यंत तत्र वसाम्यहं॥ व्यासेनाप्युक्तं। कुरुक्षेत्रं गयां गंगां प्रभासं नैमिषं तथा। तीर्थान्येतानि सर्वा
21 णि स्नानकाले भवंत्विमा तथोक्तं स्मृतिसंग्रहे। गंगां गां कुरुक्षेत्रं प्रयागोदधिसंगमां तीर्थान्येतानि संस्मृत्य ततो मज्जेज्जलाशये। एतत्ती
र्थस्मरणं तीर्थव्यतिरिक्तविषयं तीर्थे तीर्थं न द्यानं द्यंतरं पठ्येत्तेन न संस्मरेदित्यप्युक्तं चाश्व। आघमर्षणसूक्ते न त्रिरावृत्तेन नित्यशः। स्ना
नाचमनमित्येवमुपतिष्ठेत् महात्मभिरार्जिस्यन्यात्त्रिरघमर्षणं कृत्वा स्नानाचमने कृत्वा देवर्षिपितृं संतर्प्य ये शतान्प्रकारस्त्र उशजमा
उक्तः॥ द्वौ हस्तौ युग्मतः कृत्वा पूरयेदुदकाञ्जलिं। गोशृंगमात्रमुद्धृत्य जलमध्ये न लं क्षिपेत्तथा स्मृतिप्रदीपिकायामप्युक्तं। उलान्या
मपि हस्ताभ्यां अपराजितदिङ्मुखः। सहस्तां गुष्ठकौ त्रुसव्योपयहमेव वा॥ कात्स्यायनेनात तर्पणे विशेष उक्तः। नाभिमात्रे जले
स्थितश्चाचिंतयन्तर्द्धमानसः। आगच्छंतु मे पितर इमं गृह्णंत्वपोंजलिं। तयों जलीत्रात यासु मंत्रः। आकाशे निक्षिपेद्वारि जलस्थो दक्षिणा
मुखः॥ असंस्कृतप्रमीतानां स्थले दद्याज्जलांजलिं। अंजलिनियमस्तु बोधायनेनोक्तः। जलांजलिमयं दद्याद्देवाद्येभ्यः स्नातामु
वि। असंस्कृतप्रमीतानामेव मेव तटे क्षिपेत्। तर्प्यं तकारं तमुक्तां स्नानार्थमधिगच्छंतं देवाः पितृगणोस्सह। वायुभूतानुगच्छंतां त्रस्तृषा
र्तीस्तपयस्तयेति। अत्र विशेषो व्यासेनोक्तः। नमेदेत जले द्रोणपात्रां चतं वचनं नदीतीरे त्राष्टी वनास कुसकृद्याम त्रा एतांस्य भुञ्जचक्षिपेदिति
। तत्र निर्गजलाशयाद्दसौ मंत्रः। जलाशयादुत्तीर्य तीरमायो अस्मान्नं पठन्ननुत्तीर्य पीडयेद्वस्त्रमपसव्यं यथाविधीति। तत्र आश्वला
यनानां स्नानोत्तरं कालं मंत्रेणावस्त्रनिष्पीडनं ततो वासः परिधानमितरेषां तु तत्र जलान्निर्गत्य एवं करणीयं तत्रैयैठीनसिः। अंतर्जले
आचमनेऽन्तरेव बहिर्जले। बहिरेव ततो अंतरेप्यच रणं कृत्वा बहिरेवं कृत्वा सर्वत्र शुद्धिः। स्नानोत्तरं वस्त्रपरिधानं कृत्वा वस्त्रनिष्पीडन
मिति रहस्यं तत्र विशेषः। विन्यस्य दक्षिणं पादं जले वामपदं बहिः। उपवीती समाचामेद्द्विरेष सनातन इति। अन्यपादं डोप्यव्य
ते। आर्द्रवासास्स्थले कुर्यान्न पीडनमाचमनं जपं। आर्द्रवासास्यलस्य त्यस्त्र पदाचामेन्नराधमः॥ ॥ अथ वस्त्रनिष्पीडनं॥ स्नानोत्तरं का

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

र्थे अन्यथाभावाशात्तत्रायं मंत्रः॥ ॥यन्मया दूषितं तोयं शारीरमलसंभवात् तद्दोषपरिहारार्थं यक्ष्माणं तर्पयाम्यहं। इतित दु अंभ
गवतां स्नातानां गतर्पणं कृत्वा पस्मरेज्जलमध्येऽन्यथा कुरुते यस्तु स्नानमल्पफलं लभेदिति। ततोस्नानतोत्थानतो वापि यन्मे दुष्कृतं
कृतं। तत्क्षमस्वाखिलं देवि जगन्मातर्नमोस्तु त इति। नदीं संप्रार्थ्य स्नानदर्भान्विसर्जयेत्। अत्र विष्णुस्मृतौ विशेष उक्तः। स्नातः शिरो नावधुनेत्रां
गोम्पग्लायमुद्धरेत्स्नानवस्त्रं धृतं वासो न चैतैलं न्युपस्पृशेदिति। स्नात्वा तद्वाङ्गुलिं येन वासः श्वेवननिर्दुनेत् आर्द्रपवनवासांसि सिद्धा वा स्वेत न
मानवः। तस्माच्छास्नानोत्तरकालं स्नापमात्रे स्यात्पीतदुःखं। तस्मात्सर्वप्रयत्नेन जलं भूमौ निपातयेत्। अत्रोत्तीर्थ केशकालं तिष्ठेदिति स्मृत्यर्थः
॥ अत्र फलमुक्तं॥ स्नात्वा वा नाच्छाद्य यस्तिष्ठेत्तस्य कंपयतस्तस्य ब्रह्महत्यादिपापानि कंपयंति न संशयः। अत्र स्मृतिसारे विशेष उक्तः।
सुराविंदुसमा प्रोक्ताः पतंतः केशविंदवः। त एव पुरतः प्रोक्ताः सर्वतीर्थोपमा बुधैः। न पाणिनांगं निर्मृज्यात् स्नानचोद्धृत्य न माचरेत् स्नानान्यो।
न्यं पक्षतोमृज्यात्स्नानलिंगं पश्यतामिपः। स्नात्वा चानवाद येद्धृता न्नमज्यात् ससमुखं न कुर्यात् हृतसंघर्षं नातनोदहेत् ताडनं। तत्र पाण-
रा फलमुक्तं। पिबंति शिरसो देवाः पितरश्च ततास्मुखाच्छमश्रुमध्यतोय गंधर्वा अधस्तात्सर्वजंतवः। तस्मात्स्नातो नावमृज्यात्त्रशगाथा
न च पाणिनेति। तथा व्यासः। तिस्रः कोट्योऽर्द्धकोटी च यावत्यंगरुहाणि वै। स्रवंति सर्वतीर्थानि तस्मान्न परिमार्जयेत्। मार्जयेद्वस्त्रशे-
षेण नोत्तरीयेण वा शिरः। यदि प्रमादान्मृज्येत सपितॄन्पातयत्यधः। तथा स्नात्वा दूरं न तटे तिष्ठेत् प्राचीनावीतवान्द्विजः। याव-
त्स्रवति देहाद्बुरक्षीमृता दिरसपयेदिति। तथा व्यासः। चंडालपतितोदक्यानरः पश्यन्नु भास्करं। स्नानस्त्वेतो समालोक्य सचै-
लं स्नानमर्हतीति। तथा जाबालिः। स्नानं कृत्वार्द्रवासास्तु विरश्मनं कुरुते यदि। प्राणायामत्रयं कृत्वा पुनः स्नानेन शुध्यतीति॥
योगयाज्ञवल्क्यः। स्नात्वैवं वाससी धौते अच्छिन्ने परिधाय च। प्रक्षाल्योरू मृदा हस्तौ प्रक्षालयेत्ततः इति॥ तथा मत्स्यपु-
राणे॥ एवं स्नात्वा ततः पश्चादाचम्य च विधानतः। उत्थाय वाससी शुक्ले शुद्धे तु परिधाय च॥ वस्त्रलक्षणं ब्राह्मणस्य सितं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

आह्निक २ वस्त्रं नृपतेरक्तमवदातं। पीतं वैश्यस्य शूद्रस्य नीलं मलवदिष्यते। ब्रह्मक्षौमं वासः स्पृशं संतितपर्णं सह शुक्लं तथा। काषायं का
२२ षधौतं वा गोबालांत अह हिरिचित्रा छि आर्द्रं चोपवस्त्रं च कुत्सितं धर्मतो विदुः। देवलः। स्वयं धौतेन कर्तव्या स्नानधर्मा विपश्चिता। त
22 थामनुः। सांधौतं कारुधौतं च कर्मकाले विवर्जयेत् शूद्रादिधौतं कृतं वासः सर्वदा परिवर्जयेत् इति तत्र व्यासोक्तो विशेषः। नोत्तरीय
मधः कुर्यान्नोपर्यधस्तनमंबरं। नांतर्वासो विना जातु वसीत वसनं बुधः। कर्म जातं निकव वस्त्रं कुर्याच्छांतद्रुतं विफलं पुराणे। होमदेवा
र्चनोद्यासु क्रियासु यासु क्रियासु यत्तपने तथा नैकवस्त्रः प्रवर्तेत द्विजश्चाचमने जपे। तथा बोधायनः। कर्तव्यमुत्तरं वासः पंचस्वेतेषु
कर्मसु। स्वाध्यायोत्सर्गे स्वाध्याये चोत्सर्गे दाने भोजनाचमने तथा। तथा मनुः। विकच्छोनुत्तरीयश्च नग्नश्चावस्त्र एव च। श्रौतं स्मा
र्तं तथा कर्म न नग्नश्चिंतयेदपीति॥ तथा गोभिलः। एकवस्त्रो न भुंजीत न कुर्याद्देवतार्चनं। न चार्चयेद्द्विजान्श्राद्धे कुर्याद्देवविधौ
नरः। अत्र विशेषः। स व्यासः शातातपनिभ स्थं नाभिदेशे बद्धवासस्थितं। एकवस्त्रं तु तं विद्याद्दैवे पित्र्ये च वर्जयेदिति। जीवत्पितृकस्य तु योगप
ट्टार्थं द्विधार्यं। तथा बोधायनः। अकच्छः पुच्छकच्छो वा द्विकच्छः कटिवेष्टितः। यावदस्तो द्विजस्तावदपूत एव न संशयः। तथाच
गोभिलः। मलकच्छो यदा कुर्याच्छ्राद्धकर्मक्रम्यं कृ चिन्नरः। नग्नस्तु दग्धवस्त्रं स्याद्रजस्वलः भूतपटस्तथा विशेषः। स्नात्वा चानुपहतं वस्त्रं प
रिदध्याद्यथाविधि। अलाभे द्वे वस्त्रं वासं प्रोक्ष्य प्रणवेन तु। इति तत्र वस्त्रं विशेषनु कः। सप्तवाताहतं वस्त्रं शुष्कवत्प्रतिपा
दितं। आर्द्रं वापि विजानीयात् आहतं गौतमादिभिः। अत्र विशेषः। स्नानं कुर्यादार्द्रवस्त्रं तु ऊर्ध्वमुत्तारयेद्द्विजः। आर्द्रवस्त्रमधस्ता
द्वेष्टयन् स्नानेन शुध्यतीति। तथा अत्र्यो विशेषा। आर्द्रवासा जलांतस्थः शुष्कवस्त्रो बहिःस्थितः। आचमेद्विपरीतश्चेदशुचि चम
वामुयादिति। निःपीड्य स्नानवस्त्रं तु पश्चात्संध्यासमाचरेत्। अन्यथा कुरुते यस्तु स्नानं तस्याफलं भवेदिति। अत्र विशेषः। वस्त्रं
त्रिगुणितं यत्तु निष्पीडयति मंदधीः। वृथा स्नानं भवेत्तस्य वस्त्रमध्ये ह शर्मं भुनीति। तत्र स्यते निष्पीडयेत् न्यायोदेषु स्मरणा राज

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

न मध्ये यदा कश्चिच्छ्वाश्मशानोत्थान दुर्बला। निष्ठीव्यति वस्त्राणि स्नानं तस्य हि यामवेशात्स्व निष्ठीवन त्रिगुणानि तस्य न कार्यं॥ चतुर्थ्युग
स्यैव वस्त्रस्यान्यो कोवस्त्रं चतुर्गुणी कृत्य निष्ठीव प्रमृह्य शंतया। यामप्रकोष्ठे निक्षिप्य स्थलस्थश्वहृत्वमेश यदा स्कंधेनि क्षिपेच्छ
तदा स्नानं लवे चर्मपुनः स्नानं विशोधनमिति। अमंगलानि सर्वाणि आर्द्रवस्त्राणि तानि वातम्पाश बुधे हृचि द्वीमात्र आर्द्रविप्रं
न धारयेदिति॥ ॥इति श्रीदलपतिराजविरचिते गाभुराम्नानाभिधनि स्नानपरिच्छेदः॥ ॥अथ नैमित्तिकस्नानं॥ तस्य का
रणमाह। सायणीये शंखः॥ चंडालशवयूपादिस्पृष्टो स्नानं रजस्वलां। स्नानार्हस्तु परस्तानिम्नानं नैमित्तिकं हितदिति। चंद्रिका
यां। शवस्पर्शे दिवाकीर्तिं चितिधूमं रजस्वलां। स्पृष्ट्वा प्रमादतो विप्रः स्नानं कृत्वा विशुध्यतीति बोधायनः। वेदविक्रयिणं यूपं चयपतितं
विति मेव च पराशरः॥ चैत्यवृक्षश्च यूपश्च चंडालः सोमविक्रयी। एतांस्तु ब्राह्मणः स्पृष्ट्वा सचैलो जलमाविशेत्॥ वितिप्रदेशगतो पि
तं हृत्वा श्वेत्स्पृष्ट्वा। आश्वलायनाचार्यः। चितिकाष्ठं चितिधूमं चंडालं च रजस्वलां। शवं च सूतिकां स्पृष्ट्वा सचैलो जलमाविशे
त्। त्यजेद्वस्त्रं च वस्त्रं च त्रयी चागम्यं घृतं च वा। पुराणा हवा चनं कृत्वा स्नानमात्रेण शुध्यतीति। व्यासः। मासवानरमार्जारखरोष्ट्रशाखा
न शूकरान्। अमेध्यानि च संस्पृश्य सचैलो जलमाविशेत्॥ अत्र मार्जारस्पर्शनिमित्तं स्नानं भोजनानुष्ठानकाले तत्पुच्छस्पर्शविषयं
यं। चंद्रिकायां। उच्छिष्टोच्छिष्टा दूरना चांतो मात्रेत्नास्यानि वै द्विजः। चंडालपतितच्छायां स्पृष्ट्वा स्नानं समाचरेत् गतपाचमन्त्रं। मार्जा
रश्चैव दर्वी च मारुतश्च सदा शुचिरिति देवलः। श्वपाकं पतितं व्यंगं उन्मत्तं शवदाहकं। सूतिकां सावित्रिकां नारीं रजसा च परिप्लुतां।
श्वकुक्कुटवराहांश्च ग्राम्यान् संस्पृश्य मानवः। सचैलं सशिरः स्नानं कृत्वा विप्रो विशुध्यति। स्नाविकाप्रमव स्यकारयित्री। अशुद्धा
स्वयमथैतानशुद्धः स्पृशति संस्पृशेत् विशुध्यत्युपवासेन तथा कृच्छ्रेण वा पुनः॥ न चायं स्पृष्टिराव लग्नं। विडालपुच्छं संस्पृश्य स्ना
त्वा चाविप्रो विशुध्यति। भोजने कर्मकाले च विधिरेष न हाहतः। अथ पतनोत्पिडितः। बौद्धान्पाशुपतान् जैनान् लोकायतिककापि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

आह्निक
२३
23

कान्त्राविकर्मेन्थ्यामः। न द्विजोस्पृश्यामत्येलोजलमाविशेत्। पाशुपतावेदबाह्याः। मनुः। नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा चाविप्रो वि
शुध्यति। आचम्यैव तु निःस्नेहमालभ्यार्कमीक्ष्य वा। अशुचिं दिवाकीर्त्यमुदक्यां च पतितं सूतिकां तथा। शवं तत्स्पृष्टिनं चै
व स्पृष्ट्वा स्नानेन विशुध्यति। तथा च स्मृतिरत्नावल्यां। शिवं स्पृष्ट्वा तथा चैव दृष्ट्वा दुर्गादि न्यस्य देवताः। यो चर्ययेत्पण्यार्थं वै नस ह्यः पतति मानव इति
। तस्य च्छविद्पवा दउक्तः स्पृष्टे तं स्पृष्टो न स्नायादेवलं स्पृष्टं देवस्थाने च वंधनो। अन्यत्रतानुभोस्य स्वास सचैलोजलमाविशेत्। इति स्माप
स्तंवः॥ एकशाखां समारूढ श्वांडालादि यत्र भवेत्। ब्राह्मणस्तत्र निवसन् स्नानेन शुचितामियात्। संवर्तः। शवश्वाहवरान्त्यष्ट्रनाह्मकगो
मायुवानरनरकाकाकुक्कुटघ्रांशास्पृश्य स्नात्वा स्नानं समाचरेत्। शाचत्वरविंशतिमते॥ चितिं चाचितिकाष्ठं च यूपं चंडालमेव च॥ स्पृष्ट्वा दे
वलकं चैव सचैलं जलमाविशेत्। देवलकलक्षणं। देवार्चनकरो विप्रो वित्तार्थी वत्सरत्रयं। स वै देवलको नाम सर्वकर्मसु गर्हितः। स्मृतिसंग्र
हे। एतत्संवत्सरत्रयं व्यवधानेन विच्छेदे ज्ञा विषयं। सत्यं चं दूषयित्वे न स घः पतनाशचं द्रिकायां। पतितं सूतिकामं त्यं शवं स्पृष्ट्वा च कामतः। स्ना
त्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति। अंगिराः। पंचनुष्ठापांश्वपाकस्य ब्राह्मणो यधिराहति। तस्मानं प्रकुर्वीत घृतं प्राश्य विशुध्य
ति। शांस्वः। रथ्याकर्दमतोयेन ष्ठीवनाद्येन वा तथा। नाभेरूर्ध्वं नतः स्पृष्टः सद्यः स्नानेन शुध्यतीति। तथा पराशरः। अस्थिसंचयना
त्पूर्वं मालभ्य स्नानमाचरेत्। अंतर्दशाहे विप्रस्य ऊर्ध्वमाचमनं स्मृतां अस्थिसंचयनादूर्ध्वं पुत्रक सम्लेछ मित्रयाणसिका नामस्यात्। मनं देवस्य
स्व स्नानं सचैलकं। आह मनुः अजीर्णेभ्युदिते वांते श्मश्रुकर्मणि मैथुने। दुःस्वप्ने दुर्जनस्पर्शे स्नानमेवविधीयते। अभ्युदिते वं अजी
र्णे अपरे घर्म्मको द्वारे। तथा च स्मृतिरत्नावल्यां। पाराशरः। अश्रशमश्रुकार्दुपाणिर्वांतो न स्नानमाचरेत्। अन्यत्र वमने स्नायात्तथा
शौकाभ्रपात नरतिविष्णुः॥ इंद्रियं वा प्रतिहत्स्य अमेध्यं परिकर्हि चिरामुखेयिमं स्यशगते तस्य स्नानं विधीयते। इंद्रियं मधुकंय दूषि
तं काकवलाकया वा चामेध्यलिप्त प्रक्षालयेद्यद्यावा। श्रोत्रे मुखेन प्रविशेत्। यस्मिन्नात्मा नेन तस्योपहतस्य शुद्धिः। अमेध्य स्वरूपमा

हद्देवलः॥ मानुषास्थिवसास्नेहरेतोमूत्रार्त्तवं च सात्म्ये ष्वाश्रु दूषिकास्वेदो मध्यं वामेध्यमुच्यतेति। पत्नाशप्रस्त्राव तौ विधिरुक्तः स्नाचानग्नप्राशन
माचवेदिति बोधायन उक्त॥ शुनास्पर्शे शोणित स्पर्शे रेतो विण्मूत्रके तथा चितुर्णामपि वर्णानां दूर्त्ति त्रिंशत्प्राणि कामतः। अनयासंख्ययात्रिंशत्कांदचास्ना
यादित्यर्थो। तथा च षड्त्रिंशन्मते। मानुषास्थि वसां विष्ठामार्त्तवं मूत्ररेतसी। मज्जानं शोणितं स्पृष्ट्वा परस्य स्नानमाचरेत् स्नात्वा पुनरुपलेपादिशा आ
चम्य स्पृश्य गिर्भवेत्स्वा अेतानि च संस्पृश्य प्रक्षाल्याचम्य शुध्यति। स्मृतिसंग्रहे। देवाग्निदेवतं लंघन स्त्रीचाप्यरजलो। एतानि प्राक्क्रमणस्य स्नानसवा
साजलमाविशेत्। अस्पृश्यः शवसंस्कारकर्त्तास्यान्नित्यम् तक्रौ। नित्यम् तविनंस्पृश्य स्वासवासाजलमाविशेत्। शवं स्पृष्ट्वा शवं स्पृश्वाग चाश्वग्रहे
तथा। शवानुगमनं कृत्वा सवासा जलमाविशेत्। गानेभ्य सिंहिरस्थं च यतेर्य न प्रतिग्रहः। तादृशं कश्मलं दृष्ट्वा सवासा जलमाविशेत्। छेदनं ये
षणं पाकोपतेर्य न प्रवर्त्तीति तो दृष्ट्वा कश्मलं दृष्ट्वा सवासा जलमाविशेदिति॥ आत्मस्य शवानुगमने विशेष उक्तः कूर्मपुराणे। अनुगम्ये
च्छया प्रेतं धर्म्यं द्विजो नमः। गायत्र्यष्टसहस्रं तु जपं कुर्यान्नदीषु चेति। स्त्राचेति विशेषः॥ बालानां शुद्धि प्रकार उक्तः॥ प्रदीपिकायां। शिशो
रभ्युक्षणं प्रोक्तं बालस्याचमनं स्मृतं। रजस्वलादि संस्पर्शे स्नानमेव कुमारके ते बालक्षणं तत्रैवोक्तं। आकृच्छ्राकरणाद्बालः प्रागन्नप्राश
नाच्छिशुः। कुमारक स्तु विज्ञेयो यावन्मौंजी निबंधनमिति। तथा च मरीचिः। उपस्पर्शे चतुर्थस्य तद्दूर्ध्वं प्रोक्षणं स्मृतमिति। यत्तु संवर्त्तेन द्वादशवर्षा
न सक्ता तस्य स्पर्शनं स्पर्शे घस्नानं तस्य विधीयते। ऊर्द्ध्वमाचमनं प्रोक्तं द्वादशाणं प्रोक्षणं तयोरिति। तदबुद्धि पूर्वक स्पर्श विषयं। तथा च सं
ग्रहकारः। नबुद्धिपूर्व संस्पर्शे द्वयोः स्नानं विधीयते। अपाणांबुद्धि पूर्वं तु तस्य षिच्चायक ल्पनेति। अस्पृश्य स्पृष्ट स्पर्शेन शुद्धि प्रकार उ
क्तः पाराशरे गौतमेन। पतितचंडालसूतकाद्यक्याशवस्पृष्टं तत्स्पृष्टस्पर्शने सचैलमुदकोपस्पर्शनाच्छुध्येदिति। पातिनादिस्पर्शनं
समारत्य न तीयस्य सचैलस्नानं चतुर्थस्य न द्वदकोपस्पर्शनाच्छुद्धिः॥ यत्तु कूर्मपुराणे॥ चंडालसूतिक शवैः संस्पृष्टः संस्पृशेद्यदि
। प्रमादात्तत आचम्य जपं कुर्यात्समाहितः॥ तत्स्पृष्टस्पृष्टिनं स्पृष्ट्वा शुद्धि पूर्वं द्विजोत्तमः। आचामेति विशुध्यर्थं प्राह देवपितामहः॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

आह्निक
२४
५५

तदाह प्रचेताः॥ रजस्वांतरितसंस्पर्शः स्नात्वा स्पर्शे विधीयते। स्नात्वा स्पर्शे प्रयत्नो ऽन्तं तद्रजस्वांतरितेऽपि च॥ याज्ञवल्क्योऽपि। उदक्याशुचिभिः
स्नायात्संस्पृष्टस्तैरुपस्पृशेत्। अब्लिंगानि जपेच्चैव गायत्रीं मनसा स्मरेदिति। तदेतद्दंडांतरितस्पर्शविषयं। अन्यथा द्वयोः स्नानमित्य
नेन विरोधः प्रसज्येत। अत्र रजस्वांतरितस्पर्शेनेन तत्र दंडांतरितन्यायः। स्त्रियमधिकृत्योक्तं स्मृत्यर्थसारे। तदाह। यत्र पुंसः सचेलं स्यात्स्ना
नं तत्र भर्तृगामिनी। कुर्वीत शिरसि स्नानं शिरोरोगी जटी तथेति। एतच्चाशिरस्कावयि कर्तव्यं। तदाह पराशरः। ग्रहणोद्वाहसंक्रांति
यात्रार्तिप्रसवेषु च। स्नानं नैमित्तिकं ज्ञेयं रात्रावपि तदिष्यत इति। आर्तिर्मरणं। तदाह व्यासः। महानिशा तु विज्ञेया मध्यमं यामद्वयं निशि
। तस्यां स्नानं न कुर्वीत काम्यनैमित्तिकादृते इति। अन्यत्रापि। रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः। नैमित्तिकं च कुर्वीत स्नानं दानं च रात्रिषु।
तत्र रात्रिस्नाने कर्तव्यविशेषमाह पराशरः। अथ यदास्तंगते सूर्ये चंडालपतितादिभिः। स्पर्शनं तु कथं चित्स्यात्कथं शुद्धिर्विधीयते। जा
तवेदः सुवर्णं च सोममार्गं तथैव च। ब्राह्मणानुमते चैव स्नात्वा चाहतवासः शुध्यतीति। प्रद्योतद्वारात्रिस्नानं प्रदोषपश्चिमयामयोः प्राप्तं तदानया
द्वावेव दिनवदाचमाचरेत्तथा पत्नुः षड्द्विंशन्मतं। अयं हि सदातोयं रात्रौ मध्यमयामयोः। स्नानं तत्र न कुर्वीत तथैवाचमनक्रियां। यच्च मार्कंडेयप
वचनं। महानिशा तु विज्ञेया रात्रौ मध्यमयामकौ। अस्यां स्नानं न कुर्वीत सस्पृगाचमनं तथेति। तदपि काम्यनैमित्तिकमानव्यतिरिक्तविषयं। त
था च नैमित्तिकस्नानमधिकृत्याह व्यासः। प्रदोषे पश्चिमे यामे दिनवत्स्नानमाचरेदिति। मध्यमयोस्तु गृहस्थस्नानं कर्तव्यमित्याह
यमः। विप्रस्य ष्टो निशायां तु न स्नायादिति। तन्नवादिवानीतेन तोयेन स्नापयेद्ग्रसित्वे धाविति। निशायां महानिशायां। विष्णुः। स्नानाहो
यो निमित्तेन कृत्वा तोयावगाहनं। आचम्य प्रयतः पश्चात्स्नानं विधिवदाचरेदिति। अत्र स्नोदकं निषेधति वृद्धमनुः। मृते जन्मनि संक्रांतौ
श्राद्धे जन्मदिने तथा। अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा इति। अस्पृश्यस्पर्शने तु स्नोदकस्नाननिषेधो दिवाविषयः। तस्य राम०
लक्षणमाह व्यासः। महानिशा तु विज्ञेया मध्यमप्रहरद्वयमिति। तत्र विशेषमाह पराशरः। दिवाहृतं तु यत्तोयं कृत्वा चास्तगते तु तरा- २४

रात्रौ स्नाने तु संप्राप्ते स्नायादनलसंनिधाविति । गृहे जलालाभश्चेत्तदा जलानयनप्रकारमाह । स एव यदि गेहेन तोयं स्यात्तावच्छुद्धिः
कथं भवेत् । आश्मोद्धाम्नस्तमंत्रेण गृह्णीयादग्निसन्निधौ । रात्रौ गृहं शुचिः पूतं पुनः स्यात्तं तु वह्निना । अनेनैव विष्णुर्द्योतततया रात्रौ यथा दि
वेति ॥ तत्र स्नानविधिमाह पराशरः ॥ अस्पृश्यस्पर्शने जाते अशौचपाते क्षुते न गे । स्नानं नैमित्तिकं कार्यं दैवपित्र्यविवर्जितमिति । दै
वपित्र्यविवर्जितमिति देवर्षिपितृतर्पणरहितमित्यर्थः ॥ जलानयनाशक्तौ गतिमाह मरीचिः ॥ दिवाहृतं तु यत्तोयं गृहेऽपि दिन विद्यते । प्र
ह्लाद्यापि स्त्रीं ततः स्नायात्र द्योपुष्करगीषु चेति ॥ अविलकः ॥ रात्रौ स्नानं यदि भवेद्देवशपाग्निं समाचरेत् । शल्यगतिकरोविप्रो वह्नि
ना वापि नाचरेदिति । तथा च स एव । तूष्णीमेवावगाहेत यदा स्यादशुचिर्नरः । आचम्य प्रयतः पश्चात्स्नानं विधिवदाचरेदिति । न था
च स्मृत्यर्थसारे ॥ स्नायात्तु पूर्वमस्नातो निशायां सेन जलेन वा । अस्पृश्यस्पर्शने स्नानं निशायां सेन जले न जलेन चेति । अशक्तस्य मंदो ष्णोद
क स्नानमुक्तं तत्रैव । अशक्तो शोभने गृहे शोभनाऽरेच सर्वदा । न शीतलजले स्नानं कार्यं चैवोष्णसंचितमिति । स्नाननिषेधकालमाह
मनुः ॥ न स्नायादुत्सवे तीते मांगल्यं विनिवर्त्य च । अनुव्रज्य सुहृद्बन्धून्नर्चयित्वेष्टदेवतामिति । व्यासः । अतुलिप्तोन वासो ध्यायमन्व न्य
वर्षाधवा राग्रहमागत्यनस्नायात्र महानिशिनान्तरति ॥ ॥ इति श्रीमन्महाराजाधिराजश्रीदलपतिराजविरचिते श्रीनृसिंहप्रसा
दे आह्निकसारे नैमित्तिकस्नानं ॥ ॥छ॥ ॥ अथ नैमित्तिकस्नानअपवादकः सापरीये । करधमस्य शंवांतविगिर्नतु र
कर्मिराणां मे श्रुनाचरिनारं च स्पृष्ट्वा स्नानं न विद्यते । बृहस्पतिः ॥ तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे । नगरग्रामदाहे च स्पृष्ट्वास्पृ
ष्टिर्न विद्यते । माधवीयपराशरे । ग्रामेषु नास्ति संस्पृष्टिः पीत्रायांकलहादिषु । ग्रामसंदूषणे चैव स्पृष्टिदोषो न विद्यते । एतन्न्नु
त्यांत्यज दूषणातिरिक्तविषयं । तथा चोक्तं तत्रैव । दूर्वंत्यजौ च संस्पृष्ट्वा सवासा जलमाविशेत् । अन्ये यावन्मनं प्रोक्तं क्रियायां स्ना
नमाचरेदिति ॥ अंत्यः प्रसिद्धः ॥ ॥ अंत्यजलक्षणं तत्रैवोक्तं ॥ रजकश्चर्मकारश्च नटो वरुड एव च । कैवर्तमेदभिल्लाश्च सप्तैते

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अंत्यजाः स्मृता इति विष्णुः ॥ नातेरधः करार्यं वा श्रुनाय घायर्ह च्यते । प्रक्षाल्यतरमिद्भास्य पुनराचम्य शुध्यतीति । शातातपस्तु ॥ रज
आह्निक॰ २ कश्चर्मकश्चैव व्याघ्रजोल्लोपजीविनः ॥ निर्णेजकः शौनकश्च नटः शैलूषकस्तथा ॥ चक्री ध्वजी लाव्या घाती ग्रामकुक्कुटसूकरौ । पेमि
२५ पदं गांस्पृशं स्पाशि छिरवर्ज्यं द्विजादिभिः । तोयेन क्षालनं कृत्वा चाचम्य चांतः प्रपतेो मतः ॥ स्पृष्टास्पृष्टि लेशकर्णकथ्यते । स्मृत्यर्थसारे । प्राप्य
25 कारींद्रियं स्पृष्टमस्पृष्टमितरं लवेशत यो श्रविषयंप्राद्रः स्पृष्टास्पृष्टाविधानतः ॥ प्राप्यकारींद्रियं चागिंद्रियं ॥ ॥ इति श्रीमन्म
हाराजाधिराजश्रीटलपतिराजविरचिते आह्निकसारे नैमित्तिकस्नानम् ॥ ॥ अथ काम्यस्नानं ॥ तत्र सायणीयशंखः ॥ पुण्यस्नानादिकं
पत्नुदैवज्ञविधिचोदितं ॥ तद्धि काम्यं समुद्दिष्टं नाकाम्यस्तु प्रयोजयेत् ॥ तत्र तीर्थमाह । पुलस्त्यः ॥ पुष्ये च जन्मनक्षत्रे व्यतीपाते च
वैधृतौ ॥ मत्कृ द्रोहवरि स्नानं कृच्छ्राशीतिफलं लभेत् शापस्योदरे स्थितं तीर्थं गोदावर्याश्च माघके ॥ न यात्यसौ पुनर्गर्भमिति वेदविदो विदुरि
ति । अन्यच्च ॥ पुष्ये च जन्मनक्षत्रे व्यतीपाते च वैधृतौ । पक्षांते स्नात सिस्नानं महापातकनाशनं ॥ वै अध्यु लू च त्रुद्दिश्य पापः साप्याधिव
सं निधौ ॥ न प्रेत चमवाप्नोति गंगायां च विशेषतः ॥ शिवलिंगसमीपे च यत्तोयं समुपस्थितं । शिवगंगेति विख्यातं तत्र स्नात्वा दिवं व्रजेदि
ति ॥ ॥ इति काम्यस्नानं ॥ अथ समुद्रस्नानं । तत्र आचार्याः ॥ समुद्रपर्वसु स्नायात्पर्वमायां च विशेषतः ॥ पापैर्विमुच्यते सर्वैरमांते
स्नानमाचरेत् ॥ भृगुभौमदिने स्नानं समुद्रे च विवर्जयेत् ॥ शयह लोरविवारे च पुत्रैश्च न समेद्धुवइति । न समेशसस्नेशानकुर्यादित्यर्थः ॥ ॥
तत्र स्नानविधिरुच्यते ॥ संग्रहे । पाषाणस्नानं प्रथमं च कुर्याद्दावाहनं तत्र नमस्क्रियां च । अर्घ्यं ततः प्रार्थनमप्यनुज्ञां स्नानं च कुर्यादथ एम॰
तर्पणं चेति ॥ पाषाणदानमंत्रस्तु ॥ पिप्पलादिसमुत्पन्ने कृत्येलोकभयंकरि पाषाणांते मयादत्तमाहारार्थं प्रकल्पितं ॥ ॥ इति २५
आवाहनमंत्रः ॥ विश्वाचीच घृताचीच विश्वयोने विशांपते । सांनिध्यं कुरु मे देवी सागरे लवणांभसि ॥ २ ॥ नमस्कारमंत्रस्तु ॥ नम
स्ते विश्वगुप्ताय नमो विष्णो अपांपते नमो जलधिरूपाय नदीनां पतये नमः ॥ ३ ॥ अर्घ्यमंत्रस्तु ॥ सर्वरत्नमयश्रीमान् सर्वरत्नाकर

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पतः॥ सर्वरत्नप्रधानश्च गंगासागर्यं महोदधेः॥ ४॥ प्रार्थनामंत्रः॥ पृथिव्यां यानि तीर्थानि प्रविशंतु महोदधेः। स्नानस्यास्य फलं देहि सर्व
स्मात्पाहि मां हरः॥ अर्हतः पारशा अनुज्ञामंत्रकं॥ समस्तजगदाधार शंखचक्रगदाधर। देव देहि ममानुज्ञां युष्मत्तीर्थनिषे
वने॥ ५॥ स्नानकाले स्मरणीयाः॥ प्राच्यां दिशि वसुग्रीवं दक्षिणस्यां नलं स्मरेत्। प्रतीच्यां मैंदं नामानमुदीच्यां द्विविदं तथा॥ रामं च लक्ष्म
णं चैव सीतां चैव यशस्विनीं। अंगदं वायुपुत्रं च स्मरेत्मध्ये विभीषणं॥ जपेण मंत्रः॥ पिप्पलादिं कविं कण्वं हनूमंतं जीवितेश्वरं॥
मन्युं च कालरात्रिं च रुद्रं चाहं गणेश्वरं। वशिष्ठं वामदेवं च परस्परमुमापतिं। वाल्मीकिं नारदं चैव वालखिल्यांस्तथैव च। नलं नीलं ग
वाक्षं च गवयं गंधमादनं। जांबवंतं हनूमंतं सुग्रीवं चांगदं तथा। एतान्स्मृत्वा तर्पयेद्धि दूरजलमध्ये विशेषतः॥ आब्रह्मस्तंबपर्यंतं यत्किंचि
६२ हः सविंदुर्ययैकुक्षमा। पेनुयक्रवा संस्थूलस्थः कपिलः श्रोक्ता मा। १ सिंहो भयंकरः। येण सिंहः स्थूलवक्रोऽतिक्तोर वैकुंठे
62 परि। वामवक्रो परे रेखा। श्यामो हरिविक्रमः। वनमाली महाहितिः श्यामः सरस्वती। स्थूलो दामो हो मध्ये सूक्ष्म
चक्रः स्यालधरस्तमादिक्रैपं। लक्ष्मीनां चतुर्विंशतिर्दो द्वादशवाययुषा एं भवं वा पूज्याः। शालग्रामशिलायां यो मूल
मूल्यमर्पयेन्नरः। विक्रेता वानुमंता च यः परीक्ष्यानुमोदयेत्। सर्वे ते नरकं यांति यावदाभूतसंप्लवं। शालग्रामसमीपे
तु कोशमात्रं समंततः। कीटकोऽपि मृतो याति वैकुंठभवनं नरः। शालग्रामशिला यत्र तत्तीर्थं योजनत्रयं। तत्र
दानं च होमं च सर्वं कोटिगुणं भवेत्। शालग्रामसमालाचक्रं यो घारद्दामनुत्तमं। भवचक्रं तेन दत्तं स्यात्सशैल
वनकाननं। इति पुलहघमम वक्राय विरमाः। रुदा भवेत्। श्वेता च्छिन्ना शिलापृष्ठा दुःखदारिद्र्यनाशिनी।
कृष्णा मत्स्यप्रदा नित्यं च पिला चभयप्रदा। उक्ता कर्दुरा विकपीता विनिविता शिलाः। अथ क्रियुग्मः व
दाभ्रान्तातस्याभार्या विष्णोर्गदाः। सुदर्शनश्चैकचक्रो मोहैकफलदायकाः। लक्ष्मीनारायणो द्वाभ्यां भु
क्तिमुक्तिफलप्रदः। त्रिभिश्चैवाच्युतो ज्ञेयो दद्यादिंद्रपदफलप्रदः। श्रीप्रदः पुरुहूतश्च चतुश्चक्रो जनार्दनः। पं
चभिर्वासुदेवश्च गोत्रकीर्तिप्रवर्द्धनः। प्रद्युम्नः षड्भिर्ज्ञेयो लक्ष्मीकान्तिप्रवर्द्धनः। सप्तभिर्बलभद्रश्च पु
त्रपौत्रप्रवर्द्धनः। अष्टभिश्चैव शंखश्च ददाति पुरुषोत्तमः। नवभिः केशवो देवः सर्वकामफलप्रदः। द एक॰
शावताशैदव एष पूजनाद्राज्यमाप्नुयात्। एकादशभिरेश्वर्यमनिरुद्धः प्रयच्छति। चक्रैर्द्वादशभिर्देवो ६२
हृषीकेशो उदाहृतः। तस्माद्वृद्धिमनंतस्यात् पूजयानं तव्य मे इतिचक्रांकलक्षणं॥ ॥तथा॥ एहेलिं

गद्वयं नार्चयेत्ततो अग्नित्रितयं तथा शक्तित्रयं तथा पर्यावं मन्त्रादिदशकं तथा देवचक्रे ह्यात्मनार्चयेत्सर्वदर्यं तथा एतेषां पूज
नाल्लिभमुद्रेयां प्राप्नुयाद्गुहि ततश्च शाक्त्यामे पूजा सा च विस्तृता मध्यमा संक्षिप्ता च । तत्र द्वात्रिंशदुपचारा मुख्या विस्तृता
पंचोपचारा संक्षिप्ता पंचमा षोडशोपचारा सर्वसाधारणा तथा हि । ध्यानमावाहनं चासनं अभिमुखता ग्रा धावगुंठं
प्रिता स्पर्शो चोत्तम अभिषेक वस्त्र गुप्त पवीतालंक्रियालापनं । पुष्पं धूपः दीपं नैवेद्यं हविरर्घ्यो तंबूलमर्घ्यं सितच्छत्रं चाम
रालतं तन नैवेद्यं तन्त्र निवाप हस्तनिः । प्रादक्षिण्यं परिक्रमं प्रणामं अन्तसं प्रार्थनं समर्पणं पर्यु द्वासनं मुख्रतास्व
कथिता । पूजोपचारा उच्यते । तैस्तैः कथमीश संतुष्ट्यमुच्चि तिध्यवर्णितं चांगमः तस्मात्सं निरूप्य मितं मममसमा
लक्ष्म प्रसीदधुना ॥ अर्घ्यमाचमनकमधुपर्काचमानमपि । गंधादयो निवेद्यांतं पूजापंचोपचारिका ॥ ॥ अथ
षोडशोपचाराः ॥ आसनं स्वागतं सार्घ्यं पाद्यमाचमनीयकं । मधुपर्काचमनस्नानं वसनाभरणानि च ।
सुगंधसुमनोधूपदीपान्नैवेद्यवंदनां ॥ प्रयोजयेदर्चनायामुपचारांस्तु षोडश ॥ तत्रादेवतार्चनक्रमः ॥ ॥ देवार्च
नगेहप्रवेशसमये ॐ श्रीं गणेशाय नमः । ॐ यमुनायै नमः इति द्वारदक्षिणवामशाखयोः । ॐ देहल्यै नमः इति म
ध्ये ॐ द्वारश्रियै नमः ऊपरि ॐ [illegible] इति । [illegible] इति मध्ये इति सप्रधानदहं
पूजयित्वा प्रणाम्य दक्षिणांगेन नाममंत्रैः पूर्वादिक्रमेणाग्नेयादि तु इन्द्रादिलोकपालान् पुष्पादिना पूजयित्वा ॐ
देहल्यै इति देहल्या मध्ये ॐ कमलासनाय नमः इत्यासनेन ततः स्वासनोपविष्टो वा दक्षिणांते आधारशक्तिकूर्मा
नंतपृथिवीति मंत्रचतुष्टयेन पुष्पांजलिचतुष्टयं दत्वा तत्रासन उपविश्य स्वस्वपूजः शंखं स्थापयित्वा दक्षिण
भागे गंधपुष्पादिमनदीप स्थाप [illegible] पात्रं [illegible] घृतपूर्णं [illegible] तैलदीपं च स्थापयित्वा देवा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

आह्निक. न्याभिमुखो भूत्वा पुंडरीकाक्षं श्रीधरपदे स्थापयुध्येष्ठ फट् प्रभञ्जनी के शापय मनामस्ते युध्य सर्वशक्ति सर्वेश्वर सर्वे तत्त्वमुखे देहरणोपन्न
६३ सकाशपाशाहस्ता वयन्ति तति द्वादशनामान्येतत्प्रयार्थे जपित्वा प्राणायामं कुर्यात्। प्रणवस्य ब्रह्म ऋषिर्देवी गायत्री
63 छंदः परमात्मा देवता सर्वकर्मारंभे विनियोगः। इति प्रणवस्यर्ष्यादि स्मृत्वा प्राणायामस्येति ऋष्यादि स्मृत्वा यजुर्विधपु
नुपाश्यस्थि धर्मार्थं नित्यदेवतार्चनमहं करिष्ये इति संकल्प्य ताम्रपात्रेण ढक्कस्थितोदकेन वा कुर्वीत। तत्रादेवता
क्रमः। शंभोर्मध्याह्नस्फटिकप्रकाशरूपः गणेशः पश्चिमया मया विनुतास्तः शिवः। प्राक्तिशाल्पतो विष्णु
र्मध्ये प्राधान्यतो भवेदिति स्थापयित्वा तत्र सामान्यार्घ्योदकेन चतुरस्रमंडलं विधाय मध्ये कोणमव संपूज्य
तत्राधारं विन्यस्योपरि प्रशस्तपितं स्वर्णादिपात्रं शंखं वा प्रक्षालितं संस्थापितं निधाय मंत्रमुच्चारयन्।
अमृतभावनयावनयातोऽर्घ्योदकेन शंखमापूर्य तत्र पूर्ववत्तीर्थमावाह्यावगाह्य नावकुंठनमुद्रा
नि विधाय गंधादिभिरभ्यर्च्य मूलेनाभिमंत्र्य योनिमुद्रां योदीप महामुद्रया चिन्मयं कृत्वा पयकृतनाल
नोदकेन पुष्पादिनात्मानमेकादशवारं मूलेनाभिषिंच्य स्वदक्षिणभागस्थे पुष्पादिपात्रं यागाभुमवं
वं संप्रोक्षयेत तेन पुष्पादिना प्राणायामं ध्येनमेंति रास्मतत्त्वा यवि घातनाय श्रीमहाविष्णुनवायेति त्रिरा
त्मानं संपूज्य नाराच धेनु कवचास्त्रमुद्राः प्रदर्श्य प्राणायामत्रयं कुर्यात्। प्रालग्रामं प्रस्तात्म्य पुच्छताम्रा
दिपात्रे संस्थाप्योपरि तुलसीपत्रं समर्प्य यंत्रगंधादिना विलिख्य संभवो भावयित्वा वा पूजकेन स्याश्व राम.
थकदशाभिमंत्रणं। सर्वे समुद्राः सरितः इत्यादि इति तस्यकाः इत्यंतं जपित्वा गंगे च यमुने चैव गोदावरि ६३
सरस्वति। नर्मदे सिंधु कावेरि जलेऽस्मिन् संनिधिं कुरु॥ इति गंधपुष्पं निक्षिप्य सुरभीमुद्रां प्रदर्श्य प्रणवेनाs

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

खं शार्ङ्गं शंखं चक्रं दधतं देवतं पंचायुधं चाप्यवाहयेत् । विष्णुप्रजापतिस्तत्र ऋष्यादेर्गायत्री छन्दस्तथैवेति । वंप्रस्य गायत्र्यात्मको विष्णुना
विध्वतः क्रमेणमितः सर्वांह विष्णुपांचजन्यनमोक्षतात । पांचजन्यध्वनिध्वस्तमहापातकसंचय । त्राहि मां नरकं
घोरं संसारार्णवपातिनं । शार्ङ्गमुद्गरप्रदर्शनं गंधं पुष्पं च निक्षिप्य शंखोदकेन पुष्पादाय तत्प्रानं प्रोक्षयित्वा
पीठार्चनं कुर्यात् । आधारशक्त्यादिभ्यः पीठदेवताभ्यो नमः । इन्द्रादिलोकपालेभ्यो नमः । दुर्गागण-
पतिक्षेत्रपालेभ्यो नमः । आदित्यादिनवग्रहदेवताभ्यो नमः । अथ स्वविधानोक्तरीत्या तत्त्वन्यासं कुर्या-
त् । प्रथमं वामहस्ते द्वितीयां दक्षिणहस्ते तृतीयां वामपादे चतुर्थीं दक्षिणपादे च पंचमीं जानुनी षष्ठीं
दक्षिणजानुनि सप्तमीं वामजघायां अष्टमीं दक्षिणजघं । नवमीं नाभिमध्ये दशमीं हृदये । एकादशीं
कण्ठे द्वादशीं वामहस्ते त्रयोदशीं दक्षिणहस्ते । चतुर्दशीं मुखे पंचदशीं नेत्रयोः षोडशीं मूर्ध्नि ॥ ॥ अथ
पुरुषसूक्तांगन्यासः ॥ आ त्वाहार्षमिति हृदये । इदं विष्णुरिति शिरसि । त्रीणि पदेति शिखायां । विष्णोः कर्माणीति
कवचं । तद्विष्णोरिति शिरसि । त्रीणि पदा विचक्रम इति शिखायां । विष्णोः कर्माणीति कवचं । तद्विष्णो-
रिति नेत्रत्रयविन्यास इति । अथ पञ्चांगन्यासः । पञ्चात्मनि तथा देवन्यासं कुर्यात्समाहितः ।
इत्येकैदेवविधिपूर्वकन्यासकर्मणः ॥ ॥ अथ षोडशोपचारपूजाक्रमः । आवाहनासनं पाद्यार्घ्यं च
मनस्नानवस्त्रोपवीतगंधपुष्पधूपदीपनैवेद्यताम्बूलप्रदक्षिणाविसर्जनाख्या षोडश । तत्र सहस्र-
शीर्षेत्यावाहनं । पुरुष एवेत्यासनं । एतावानस्येति पाद्यं । त्रिपादूर्ध्व इत्यर्घ्यं । तस्माद्विराडित्याच-
मनं । यत्पुरुषेणेति स्नानं । आसनं गायत्र्या उपवीतं । तस्माद्यज्ञात्सर्वहुत इति गंधं तस्माद्यज्ञा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

६

आ॰ क्रि॰ सर्वहुतस्रुचइतिपुष्पंतस्माद्दत्वा आज्यार्थं तत्त्रिधूपं यत्पुरुष मिति दीपं ब्राह्मणोस्य ज्योतिर्नैवेद्यं द्रुमाम्नस इति
६४ आचमनं गायत्र्या तांबूलं नाभ्या आसीदिति विसर्जनं जज्ञेन यज्ञमिति ॥ अथ विशेषः ॥ स्वर्णरजतताम्रादीनां
64 सर्वेषामर्घ्यभाजनं । शिवस्तुर्य्यापरिस्पर्शं विन्यत्र प्रशस्यते । शालग्रामे स्थाप्यदेवस्य नावाहनविसर्ज
ने शालग्राम शिलायां वा नित्यं सन्निहितो हरिः । नित्यमेवार्चयेद्देवं यदीच्छेत्पुण्यभाजनः । सर्वत्रायं वि
शेषः । वैदिकमंत्रोच्चारणानंतरं तारेण शिवशक्तिनेत्री महाविष्णवे सर्वात्मने इदमासनं मित्यादि
सर्वत्र एवमुक्तप्रकारेण प्राणायामादिन्यासांतैर्न्यासमंत्रैः पीठपूजा कार्या । एवं सपरिवारं श्रीमहाविष्णुं संपूज्य निवेद्यमन्त्रेणामंत्रो
द्य सम्प्रुक्ता मेमि मंत्रचक्रधेनुमुद्राभ्यां संरक्ष्यामृती कृत्वा नासिकां गुण्डेन स्पृशन् शंखोदकेन मंत्रेणानिवेद्यातुं परिषार
दृगतान्मोनिवेदयेत् ॥ देवभोजनावमोजनपाः ॥ ॥ शाल्योदनं सुमनोज्ञं शाखिकरमिति दुग्धपायससापूपसवलेखपेयसवोच्यं
मितमखलपलं वाकिराद्यं सदा शर्करं । आर्षधर्षाम्बं समीपं नयनकल्विकारं राजिकैलामरीचलवादि यः शाकराजीपरिकर
ममन्तात् घृतेन सूपं जुस्तवन्तत्व ॥ ब्रलैसाधैः परिचतुर्भिः सूपविधैः सम्मेलालसम्या सिंज दललपक्र प्रासादं वैष्णवमान्यं
। नमः क्रीडा प्रहसन्मुखैः हासयत्स्वं किमोकृत्वा भुंक्ते पात्रेजननाद्विचितयद् दुर्गं श्रीनृसिंहः ॥ १ ॥ ततस्त्वाचमनीयं कारयदुत्तरनंतांबूलादि
कर्पूरारार्त्रिकं कुर्यात् ॥ ॥ यस्मिन् त्यागेनैव मधुमथि भवभुजां मंडनं मंडनानां सर्वासां संपदां यः त्रिजगतित्रिगतां मंगलं मंगलानां ।
हेमामत्रस्य पूर्णा दधिमधुलवगोदिष्ठ मुक्तार्थिवार्थैर्नीराज्यः श्रीनृसिंहो दिनकरकरजिद्रत्नदीपावलिभिः ॥ ४ ॥ तातागृहा
दीति जपति वेदनं प्राणामध्य । ध्येयः सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरंचिनुतं शरण्यं । भृत्यार्तिहं प्रणत एम॰ ६४
पाल भवाब्धिपोतं वंदे महापुरुष तव चरणारविंदं ॥ इति ॥ ५ ॥ दोर्भ्यां पद्भ्यां च जानुभ्यां उरसा शिरसा दृशा । मनसा वच

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

साष्टेति प्रणामोष्टांग उच्यते । द्वाभ्यां बाहुभ्यां च सजानुभ्यां शिरसा वचसा धिया । पंचांगस्तु प्रणामः स्यात् पूजासु प्रवरा
विमौ ।७। प्रदक्षिणां तु यः कुर्याद्धरेर्भक्त्या समन्वितः । हंसयुक्तविमानेन ब्रह्मलोकं स गच्छतीति प्रदक्षिणापि कार्या ॥ ॥
अथ पूजाक्रमः ॥ मुक्तिपुष्पांजलिं दत्वा गणेशाद्यर्चनं भवेत् । गणेशमेवमुख्येभ्यः तत्र सूर्यक्रमाद्भवेत् ॥ रूपविधाने । ग
णेशार्कौ समभ्यर्च्य शिव लिंगं प्रपूजयेत् । अर्चयेद्वा शिवं पश्चात् शिवमाहात्म्ये तु केशवः । तातादुर्गादि एवं स्याद्दर्शनक्रि
या । बकुचपटि शिवं । तं मुखैर्वैदह्ये देवं नाथः पुष्पैः समर्चयेत् । कणैर्भक्तिपत्रोयं बज्जपातसमं भवेत् । पवित्रं विष्णु
निवेद्यं सुरसिद्धर्षिभिः स्मृतं । अन्यदेवस्य नैवेद्यं भुक्त्वा चांद्रायणं चरेत् । अग्राह्यं शिवनिर्माल्यं पत्रं पुष्पं फलं
जलं । शालग्रामस्पर्शात् सर्वं याति पवित्रतां । योऽर्चयेद्विधिवद्भक्त्या पापनीतिश्च साधनैः । पूजाफलार्ध
मेवाप्य न समग्रफलं लभेत् । एकं विनायके कृत्वा षष्ठे सर्वेत्री गौरीं शंकरे । चक्रार्कि केशवे द्यात् । सप्त सप्तैः प्रदक्षिणा
शालग्रामशिलायां तु पत्रमपी वा यत्कृत्ममल्लके । प्रत्येपर्णां प्रकुर्वीत ब्रह्महा मनिग घते । शंखे स्थितं च यत्तोयं
भ्रामितं केशवोपरि । अंगलग्नं मनुष्याणां ब्रह्महत्यादिघं व्योहति । शंखलग्नं तु यत्तोयं भ्रामितं केशवोपरि । वंदते शि
रसा नित्यं गंगास्नानेन तस्य किं । कल्पपादोदकं शंखे वैष्णवानां महात्मनां । योऽदद्यात्तुलसीमिश्रं चांद्रायणश
तं लभेत् । तुलसी च विलक्षपादाब्जं शंखे कृत्वा तु विष्णवे । यो दद्याद्विष्णवे नित्यं स मुक्तो भवसागरात् । शालग्रामो
द्भवे तीर्थे पीतले सोमके कोटिशः । अज्ञानाद्दिंदवं ज्ञानाद्धारिकं व्रतमाचरेत् । तस्मात्सर्वोत्तमं तीर्थं तुलसीवा यत्र सर
लि विन्दु । मंत्रं चापि विधिवेनेन सर्वं भवति शोधनं । त्वमेवाहं महं वंच संकिन्मात्रवपुर्भवान् । आवयोरंतरं भ्रां
ति निरूपणा वा कल्पान्तु केयमात्मार्पणं तव स्वामीतं करानीतं स्वयं पतितमेव वा । एतदंप्रत्ये एनीतं तस्य पूजाव

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

निःफलाः। धूपादीं च तथा दीपं च गन्धं चापि नमस्कृतं। सहजन्मार्जितं पापं तत्क्षणादेव नश्यतीति। नवावश्यककर्माणि गार्ह्ये
ऽतिथिप्रतिकारः। स्नानं संध्या जपो होमः स्वाध्यायो देवतार्चनं। वैश्वदेवं तथातिथ्यं नवमं पितृतर्पणमिति। स्कंद
पुराणे तु। गवाह्निकं कर्म तांश्च स्पृहसवचपानुक्षे यतः प्रतीयते। तत्र पंच महायज्ञाः ब्रह्मयज्ञो देवयज्ञः पितृयज्ञो
भूतयज्ञो मनुष्ययज्ञश्चेति। एतत्स्वरूपं तु। अध्ययनं ब्रह्मयज्ञः होमो देवयज्ञः मंत्रैरेकसप्तमौ नारवेन्नाहुति
रवनं भूतयज्ञः पितृश्राद्धं पितृयज्ञः अथवा विप्रदेवमध्ये पितृभ्यः स्वधेति। बलिहानमेव पितृयज्ञ इति तद्दिहका
त्यायनः श्राद्धं वापि यज्ञः स्यात् पित्र्यो बलिरथापि वेति। ततश्च नित्यश्राद्धं बलिहानं वा पितृयज्ञः। अतिथिपू
जनं मनुष्ययज्ञः। अन्ये तु मन्यन्ते। ब्रह्मयज्ञः स्वाध्यायः देवयज्ञो होमः नित्यश्राद्धं पितृयज्ञः बलिकर्म भूत
यज्ञः अतिथिपूजनं मनुष्ययज्ञ इति। अपरे तु मन्यन्ते। स्वाध्यायाध्ययनं ब्रह्मयज्ञः होमो देवयज्ञः देवय
ज्ञात्र होमेण देवयज्ञमंत्रैरन्यैरपि अन्येतु नरभागो बलिहरणं भूतयज्ञः। प्राचीनावीतिना स्वधा पितृभ्य इति मंत्रे
ण दक्षिणाभिमुखं दक्षिणस्यां पात्रदानं पितृयज्ञः निवीती भूत्वा सनकादिमनुष्येभ्यो हन्त इति मनुष्ययज्ञः अतिथिपू
जा वा। नित्यश्राद्धं वा ऽपुत्रे चोद्दिश्यैकं देवनियमदक्षिणा रहितं। तत्र तोऽर्थ्यासः ततो द्वारपूजनमिति। एतत्स
र्वं तु मनुना। अध्यापनं ब्रह्मयज्ञः। पितृयज्ञस्तु तर्पणं होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनमि
ति एषां स्वरूपं त्वनूपविधिः। अध्यापनं अध्ययनं संगृह्णातीति अध्यापनाध्ययने ब्रह्मयज्ञो यथासंभवं त
र्पणमन्नाद्येनाद्भिर्वा नवेति होमो दैवो यज्ञः देवसंबंधि। भौतो बलिः भूतानि देवता अस्येति कर्मविशे
षनामधेयमेतत् नृयज्ञोऽतिथिपूजा रिश्वोद्यतभ्य इति तत्र बलिहरणं भूतशब्देन विहितं साहचर्याद्द्वावेव कर्मणो भूतयज्ञ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

प्रदेने नोक्ता। अतिथीनामार्धनं पूजनं मनुष्ययज्ञः। ननु कथ मन्त्रब्राह्मणाध्यापनस्य यज्ञता तत्र देवतोद्देशेन द्रव्यत्यागा
भावात्। नहि तत्र देवताद्यर्थं तेष्वयतवा किंतु अदिव हितार्थं वेदाद्य हरो ब्राह्मणानामन्त्रं दर्शपात। सत्यमेतत्तथापि स्वाय
नश्चाद्मरहं ब्रह्मयेप्रयुज्यते अतिथिपूजने यज्ञशब्दवन्नातिथेर्देवताचे पितृस्य तिवाक्याय भोजनये
स्मृजेयदितिवदर्थितिथिभ्यो यज्ञो तेस्य प्रवणात्। अतः कथंचिद्यज्ञशब्दप्रयोगः। एते च पंच महायज्ञा नित्य
तया प्रतिदिनमनुष्ठेयाः। ननु पंच सूना गृहस्थस्य वर्तन्ते गृहे गृहे सदा। कंडनी पेषणी चुल्ली उदकुंभ
उपस्करः तासां पावनार्थाय पंच यज्ञाः प्रकीर्तिताः सूना इव सूनाः मारणं विक्रयार्थं च पशुर्वधस्थानं
मः अपरतामासस्य एते अनुष्ठीयमाना यथा पापहेतवः एवं दुष्प्रादयो पिपापहेतुत्वाद्धाणा
पराः सूनाममाः यद्वा सूनादिमा स्थानं मुक्तिं चुल्ली वलादिपि पाणि ह ध्यादि कुल्ली पाकस्थानं उदकुंभ उदपात्रं उपस्करः शू
र्पादिः। अत एतद्दोषनिरासार्थत्वात्काम्यता स्यादिति चेन्नैवं अहरहर्हिपावनं च व्यपेयतिन काम्यतां। शंखेनापि
नित्यता उक्ता पंचयज्ञविधानं तु गृहीनित्यं महापयेन। आचा नित्यमेवैतत् इति शास्त्रार्थः। वैश्वदेवश्च सायं प्रातः
कर्तव्यः। अयं च पुरुषार्थ इति केचिन्मन्यंते नित्यचावणातः। केचित्तु अन्न संस्कारार्थ इत्याहुः सायंप्रातः सिद्धस्य
हविष्यस्य जुहुयादित्युक्तेः। केचित्तु पुरुषार्थत्वमन्न संस्कारार्थत्वं च मन्यन्ते इदमनुपपन्नमिवाभाति। पुरुषार्थ
श्चेन्नान्न संस्कारार्थः अन्नसंस्कारार्थश्चेन्न पुरुषार्थः प्रकृत कर्मणः पुरुषार्थतायां द्रव्यस्य विश्वदेवकर्मी
र्थता स्यात्। अन्नसंस्कारतायां च विश्वदेवस्य कर्मणो वार्थतार्थे स्यात्। तस्यैव तन्मेव प्रकृति गुणप्रकृति गुणात्वं प्र
धानत्वं च न च भवति परस्पर विरोधात्। अत एतर्हि अन्न संस्कारता सिद्धस्य हविष्यस्य जुहुयादिति श्रुतेः इदमसत्।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

आह्निकः सायंप्रातर्विश्वदेवः कर्तव्यो बलिकर्म च। अनश्नतापि सततमन्यथा किल्बिषी भवेदिति कात्यायनस्मरणात्। एवं हि स्मृतिर्विश्व
देवस्य पुरुषार्थता माहात्म्यमनुनापि पुरुषार्थतापि स्पष्टीकृता विश्वदेवेनानुनिर्हृते यद्यन्योऽतिथिरागच्छेत्। तस्मा अन्नं
९९ यथाशक्ति प्रदद्यान्न बलिं हरेदिति। अयमर्थः। विश्वदेवोत्तरकालमतिथौ पूजिते सिद्धान्नाभावे यद्यन्योऽतिथिरागो
66 वेत् स भोजयितव्यः। पुनरन्नं पाचयित्वा सो देयो न बलिर्हर्तव्यो वैश्वदेवं च न कुर्यादिति। यद्यन्नसंस्कृतस्यान्नप्रतिपा
कं वैश्वदेवानुष्ठानं स्यात्पुनरनुष्ठेयता च याद्यमानानां तातवद्यागत्तमानानाशिंसापात्रमिवत्वद्यान्यमन्नं सं
स्कारं तां नावर्तयति। गृहप्रविष्टेऽपि। प्रवासस्थितस्याप्यवश्यकर्तव्यता दर्शिता। प्रवृत्ते दाहिताग्नि
श्चेत् दाविति कालपर्यायात्। यस्मिन्नग्नौ भवेत्पाको वैश्वदेवस्तत्रैवेति। तथा गृह्याग्नौ श्रौते च वा
हीयं क्रियात्तत्र निरितिरेतद्विपुरुषार्थतां स्पष्टयति। अथ सायंप्रातरपि स्पोत्पत्तिप्रयोगार्थतामा
नेनादरहरित्यस्याधिकाराद्यर्थतास्त्रकं च विश्वदेवः कोपासनेऽनुहोतव्यः शालाग्नौ च विजानता। वि
कल्पः पचपाकार्थी नास्त्येवात्र कश्च व्यक्तिरिति तथा च याज्ञवल्क्यः। स्मार्तं कर्म विवाहाग्नौ कुर्वी
त प्रत्यहं गृही। दायकालाहृते वापि श्रौतं वैतानिकाग्निषु। तथा मनुः। वैवाहिकेऽग्नौ कुर्वीत गृह्यकर्म
यथाविधि। पञ्चयज्ञविधानं च पक्तिं चान्वाहिकीं गृही इति च तु विश्रान्तिमत्त। प्रातर्होमं तु निर्वर्त्य समुद्ध
त्य हुताशनं। तत्रैव महानसे हुत्वा तत्र पाकं समाचरेदिति। यत्राग्नौ पाकः तत्रैव होमः। तदुक्तं कूर्मपुराणे। यदि स्मा राम०
लौकिके पाकः स्यात्तदन्नं तत्र हूयते। शालाग्नौ तत्र चेदन्नं विधिरेष सनातन इति। अङ्गिरसाप्युक्तं। शालाग्नौ ९९
वा पचेदन्नं लौकिके वापि नित्यशः। यस्मिन्नग्नौ पचेदन्नं तस्मिन्होमो विधीयत इति॥ ॥ इति विश्वदेवः॥ ॥अ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यन्नित्यश्राद्धं ॥ एषाहरहःश्राद्धमिति मनुना दर्शितं । इदं च नित्यश्राद्धं पूर्वं कर्तव्यं पश्चाद्वैश्वदेव इति हेमाद्रिः । अपरार्कमते तु पू
र्वं वैश्वदेवः पश्चान्नित्यश्राद्धमिति । तत्र पूर्वपक्ष एव हेमाद्रिनित्यश्राद्धमेव पंचयज्ञान्तःपातित्वात् स्वशाखानुसारेण क्रमः ॥
॥ तदुक्तं मार्कण्डेयपुराणे ॥ कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा । पितॄनुद्दिश्य विप्रांस्तु भोजयेद्विप्रमेव वेति ॥ अत्र विशे
षः । नामन्त्रणं न होमश्च नावाहनविसर्जने । न पिण्डदानं न चार्घ्यं नित्यं कुर्याद्द्विजोत्तमः । भोक्त्रभावे तूद्धृत्य यथाशक्ति कल्पयित्वा ब्रा
ह्मणायैव देयं तदभावे गोभ्यस्तदभावेऽप्सु प्रक्षेप इदं च नित्यश्राद्धं तदेकदेशे कृतेऽपि नियतं त्रयमाब्दिकश्राद्धं न्यूनं त्रिश्राद्धादि
त्व एतद्दैवतानां प्रकृष्टत्वात् । यत्र सांवत्सरिकदोषेण च नित्यश्राद्धदेवता तत्र कर्तव्यमिति । तदुक्तं नित्यश्राद्धं न कु
र्वीत प्रसंगाद्यत्र सिध्यति । श्राद्धान्तरे कृते त्वत्र नित्यत्वात्तन्न हापयेदिति ॥ ॥ अथ पाकनिर्णयः ॥ तत्र च स
पिण्ड्याद्यानां दर्शश्राद्धं प्रकृतिं तस्यां विचारितायां समानमितरत्र चेनेमेति सामभिरन्यत्र येन प्रकृतौ विचारिता
एवेति सैव विचार्यते । तत्र नित्ये वै नियमविशेषाभावान्नित्ये वैश्वदेविक एवपाकत्वात् यथोक्तं च मदनरत्ने
श्वैदेव स्यान्निषेधान्न च श्राद्धेषु एकपाकांशं । केचनैः दर्शमासादयन्ति । तत्र श्च दर्शश्राद्धस्य विकृति नित्य
निमित्तिकाम्यश्राद्धोपलक्षकः तथा च दर्शे नित्यनैमित्तिककाम्यश्राद्धार्थं वैश्वदेवार्थे एक एव पाक
उत पृथगिति विचार्यते तत्र वृद्धा मः । पृथग्वा पाक इति । तयोक्तं स्मृतिदर्पणे । पृथक्पाकेन वा नित्यश्राद्धं कु
र्यादिति तत्पक्षे हीनं स्यात् । पृथक्पाकेन नैमित्तिकादिति तथा लौगाक्षिः । पित्रर्थं निर्वपेत्पाकं वैश्वदेवा
र्थमेव च । वैश्वदेवं न पित्रर्थं न दार्शं वैश्वदेविकमिति तानोर्ध्वविवक्षः । ब्राह्मणविसर्जनं । तत शेषेणो वैश्व
देवः कर्तव्यः श्राद्धात्पूर्वं मध्ये वा वैश्वदेवानुष्ठाने पृथगेव पाक इति । एतमेवार्थं पैठीनसिवाक्यमुक्त्वा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

आह्निक. योद्धलयति पितृपाकात्समुद्धृत्य विश्वेदेवं काम्यात्तिथिः। अप्सु नित्यं तथैव श्राद्धं पितॄणां नापतिष्ठत इति। ननु ब्राह्मणानां विसर्जनमपि
६२ तस्य पितृपाकत्वाविशेषात्। उत्तरकाले पि दैवार्थं पितृपाकेन विश्वेदेवानुष्ठाने विशेषमतीतिचेन्न पितृत्वेदैवपक्षपरि
67 कल्पितहविषस्त हुतशेषेण संयोगाच्छकालेनतदुपभोग्यसमनंतरमेव न संवेदनं निवृत्तेर्नत्यक्तपाठस्तत्काले पितृसंबंध
स्य निवृत्तत्वात्। अत एव शिष्टा विसर्जनानंतरं विश्वेदेवं तत्तेनपाकेनानुतिष्ठंति आचारात्पि पर्दपर्यालो
तिमूल्यपुचेति स्पष्टमेव। ननु श्राद्धं तत्र चेत्तन्नित्यपाकेन श्राद्धाहोचेन्नव्यपाकपाकेनैव नरसिंहाश्राद्धाहावदुक्ता
सर्पसा तिनक्रच्चेत्पूर्वमेवानुतिष्ठतां कोनामाश्रावर्षनिका गां कोधयेत्। तदाहलौगाक्षिः। पक्षांतं कर्मनि
र्वर्त्य विश्वदेवं च साग्निकः पिंडयज्ञं ततः कुर्यात्ततो न्वाहार्यकं बुध इति। यज्ञांतं वा मन्त्रन्याधानमिति यावत्। अन्वाहार्य
कं दर्शश्राद्धं। श्रौतस्मार्तानीन्यतवा निमानः साग्निकः श्रौतग्निमान्वा तथा मनुरपि पिंडयज्ञं तु निर्वर्त्य विप्रश्चंद्रक्षयेग्नि
मान्। पिंडान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकमिति। अग्नि मानश्रोता निमान्। साग्निको पि एकादशाहश्रा
द्धे पश्चाद्दैवं वैश्वदेवं कुर्यात्। तथाचपरिशिष्टं। संप्रवृत्तपार्वणश्राद्धे एको दिष्टे तथैव च। अग्रतो वैश्वदेवस्य पश्चा
देकादशेहनीति। ततश्च श्राद्धे सर्वं वैश्वदेवकर्तव्यतां प्रतिपादयद्भ्यां वाक्याभ्यां लोगाक्षिवचनपर्यालोचनया श्रौता
ग्निसद्विषयतया न्यवस्थाकल्प्या। तथाश्वलायनः ॥ श्राद्धप्रयोगं कुर्वीत वैश्वदेवं तु साग्निकः। एकादशा
हिकं मुक्त्वा तत्र चान्ते विधीयत इति। तथापि नरश्राद्धमकृत्वानु विश्वदेवं करोति यः। अकृतं तद्भवेच्छ्राद्धं पितॄणां नो एम॰
पतिष्ठत इति। तथाच वृद्धहारीतः। हुत्वाग्नौ पार्वणांतमथ ब्रह्मतिपर्वणि। महालये तु पिंडांते वैश्वदेवो बुधैर्विधिः। तथा ६२
याज्ञवल्क्यः सामगाः पूर्वमथ कुर्वंति बह्वृचाः। अपरे गिरसञ्चैव तु विश्वं यं विधिरिति। तथाह गौतमः। पितृश्रा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

इमत्कृत्वानुवैश्वदेवं करोति यः । अकृतं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठत इति । तथा मधुशुष्कपात्र प्रतिवासरस्विष्टो होमः
श्राद्धाहे क्रियते यदि । हव्यं हव्यन ???तिकव्यानि पितरस्तथा । तनुकालतर्पणं स्मर्यते । अग्नौकरणान्नेन होमः वि
कोऽयं द्वितीयः श्राद्धविसर्जनं तृतीयः । तत्कृतं तद्वलौ ?? ।। विश्वदेवाहुति ??वाया??णामेज्जनाज्ञानुहुया
मूलयज्ञाद्विश्राद्धं कृत्वानुतत्क्रममिति । तथाभविष्यति पितृनुत्संतर्प्य विधिवद्दलिं दत्वा विधानतः । विश्वदेवं त
तः कुर्याच्च पश्चाद्ब्राह्मणतर्पणमिति च लिखितकरः । पिण्डनिर्वपेति मन्त्रेणादेयः पश्चाद्ब्राह्मणभोजनं भूवि
भोजनमित्यर्थवत् । तथा मत्स्यपुराणे उद्वृत्य पतितं निषेधाद्विद्याविसर्जिताः । विश्वदेवं ततः कुर्यान्नि
वृत्ते पितृकर्मणीति । सत्यं त्रोपासनाग्निः ज्ञानग्निकृत्य भवति न सर्वे सर्व स्येति तद्गृह्णं वशिष्ठेन । विश्व
देवमहत्वे श्राद्धं कुर्याद्दन्तनिक्रः । हुतशेषं तत्त्रैविकायै पितॄणां नोपतिष्ठत इति ।। अत्रात्रिः । पुत्रो भ्राता पि
तापि वा । शिष्यकः पिष्यश्वशुरमातुलाः । पवित्रोऽत्र यत्राणाश्चदृष्टास्ते बलिकर्मणारिति । अत्र कृते विश्वदेवे तु
भिक्षुकोऽग्रहमागतः । उद्धृत्य वैश्वदेवार्थं भिक्षां दत्वा विसर्जयेत् । ब्रह्मचारिणि यतिश्च विद्यार्थी गुरुपोषकः । अ
ध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः ।। ।। अथ वैश्वदेवानुष्ठानक्रमः ।। आचम्य तिथ्यादिकं सङ्कीर्त्य उपात्त
दुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं पंचसूनापनुत्तये वैश्वदेवाख्यं कर्म करिष्य इति संकल्प्य परिसमूह्य प
र्युक्ष्य विश्वानि न इति ऋग्वचना अर्चयेत् तृतीय योगस्यान्नं हस्तेनाह विश्वमन्नयत्राविधि क्रियमाणो होमस्य हस्ता
भ्यर्कं शाखाहृदि सर्वं निधाय दक्षिणहस्तेन जुहुयात् । तथा च कात्यायनः । जुहुयात्सर्पिषाभ्यक्तं तैलक्षारविव
र्जितं । दध्ना क्षीरेण पयसा तदभावे तु वारिणा ।। तत्र मन्त्रान्याह ।। श्लोकः । अथ प्रातः सिद्धस्य हवि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

आह्निक॰ ६८ 65 घृतमेवजुहुयादग्निहोत्रदेवताभ्यः सोमायवनस्पतये अग्नीषोमाभ्यामिन्द्राग्निभ्यां द्यावापृथिवीभ्यां धन्वन्तरये इन्द्राय विश्वे
भ्यो देवेभ्यो ब्रह्मणे स्वाहेति । हविर्येतेभ्यो हविष्यं । अग्निहोत्रादेवतास्सूर्याग्निप्रजापतयः । प्रजापतिपदस्थाने तिर्यैश्व
देवेभ्यस्स्वाहेति त्रिष्वग्निपाको वा स्वधायि । अत्र जपेत् । घृतमिति मिश्रहोमे स्वेनैव करांगुलिच्छिन्नं । उत्तानेन तु हस्तेनाङ्ग
गुष्ठाग्रेण पीडितः । संहतांगुलिपाणिना लवणाय लाजुहुयाद्बुधः । ततश्च सूर्यायेत्यादिभिर्मन्त्रैर्दद्यादाहुतिं
हुत्वाऽग्निमुपस्थितमिति विभूतिं ध्यायेच्चाग्निमनश्चोपस्थापयेत् । आपस्त्वं । अग्निर्धुवंतं विश्वेदेवप्रजा
पतिस्विष्टकृदिति विशेषात्ता विधिना कार्य्यः ॥ इति देवयज्ञः ॥ अथ भूतयज्ञः । स च देवयज्ञान्ते प्राग्वैश्वदे
वकर्म्मणः । अयं पंचकाम्यः । आयुष्कामो दिवारात्रौ भुवनानां बलिं हरेत् । मृत्युरोगविनाशार्थीनराका
रं बलिं हरेत् । मृत्युरोगविनाशार्थी नराकारं बलिं हरेत् । जनवश्यकर्तुकामो वल्मीकास्यं बलिं हरेत् । आ
पुत्रार्थप्राप्तये पुत्रविद्यार्थमग्नाविति । कामक्रोधमोहार्थी चक्राकारं बलिं हरेत् । पंचविधेषु बलिषु वि
प्राणां नित्यश्चक्राकृतिर्भवेत् । चक्राकारं मध्यच्छिद्रं कुर्यादग्निसमीपतः । बदरीफलमात्रं तन्मध्ये पश्येद्वि
निक्षिपेत् । पकाभावे प्रकायास्वेचान्नं तंडुलान्नोपधीं युवा पयोदधिघृतं वा पिण्डं स्तम्भफलानि वा । यो जया
देवयज्ञाय जलं वापि सुवाञ्जले । हविष्ये पयोवाऽमुख्या लवणान्न व्रीहयः स्मृताः । माषकोद्रवगौरहीन्नस
र्व्वालाभे पि वर्जयेत् । गोघः सर्वपाकान्नश्चच्या पञ्च यज्ञा दक्षिणाकाचा ह्यपरां चोक्ताः । अयं पंचकालद्वये पि राम॰
कार्यः । अयं च बलिहरणविधिरग्न्यनुत्तरे भोगोक्तलेयः । एतेनैव सर्वोपहारहेत्यादि निर्दिष्टाभिर्निरन्तरं प्रकारा संस्थां ६८
पंक्तिं कल्पयानुप्तः एतेभ्यस्तस्मा इत्यादिभिः । पिंडभिः प्राक् संस्थानेव बलिं हरेत् । इहापि भवति वा हकारेण पि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

त यज्ञको हुतशेषं तु यो दद्याद्धायसेभ्यः कृष्णं चैव । ब्राह्मणाना दाता विप्रो हुतं तस्य तु हव्यं भवेत् । वैश्वदेवाहुती हुत्वा ब
लिकर्म यथाविधि । कुर्याद्गृही प्रयत्नेन नो चेत्तत्र समेव तु । वैश्वदेवं तु कृत्वैव प्राणायाममेकं तु चरेत् । वैश्वदेवो
रेदिति शौनकः । अथ बलिहरणमेताभ्यश्च देवताभ्यः अग्नये स्वाहा पृथिव्यै स्वाहेति प्रोक्ष्य इन्द्राय स्वाहेन्द्रपुरुषे
इन्द्रपुरुषेभ्यो यमाय यमपुरुषेभ्यः सोमाय सोमपुरुषेभ्य इति प्रतिदिशं ब्रह्मणे ब्रह्मपुरुषेभ्य इति मध्ये वि
श्वेभ्यो देवेभ्यः सर्वेभ्यो भूतेभ्यो दिवाचारिभ्य इति दिवा नक्तं चरेभ्य इति नक्तं स्वधा पितृभ्य इति प्राचीना
वीती शेषं दक्षिणाग्नौ निनयेदिति भूतयज्ञः ॥ ॥ अथ पितृयज्ञः ॥ प्राचीनावीती पितृभ्य इति मंत्रेण शेषान्नं द
क्षिणस्यां दिशि दद्यात् ॥ ॥ इति पितृयज्ञः ॥ अथ मनुष्ययज्ञः ॥ निवीती भूत्वा सनकादि मनुष्येभ्यो हं
तं ॥ अथ विशेषः । तत्रापि व्यासः प्राह । ब्राह्मणाय भिक्षां दद्यात्पितृभ्यः पिण्डमन्नं तथा चान्यैः पितरः
प्रियन्तां पितृभ्यः प्रक्षिपेत् । पश्चात्पूर्वं तदेव । नित्यश्राद्धमदैवं स्यात्पश्चात्पिण्डादि वर्जितं । नान्नेनैव नहि
प्रश्नस्तदन्नं तद्विप्राय दत्तं यथाशक्ति नियमो नास्ति किंचिद्दत्वा विप्रेभ्यो देदितिश्राद्धे । अतिथिं समाय मान
तम पि वा भूतानां दैवैः भावयेदिति । अथ गोग्रासः सौरभेयि जगन्माता देवानाम मृतप्रदे । ग्रास
मिदं गृहाण त्वं भक्त्या प्रदेयं मया । गां प्रदक्षिणीकृत्य पश्चाद्देवो करोति हन्ता रामनुष्याणां पितृणां च
स्वधा तथा । गृहं प्रति भूतबलिं प्रक्षिपेत् । नमो नमस्ते तिष्ठेत् । अतिथिं प्रतीक्षेत हस्तौ पादौ प्रक्षाल्याव
रोहेद्गृहे प्रवेशयेदिति । शांता पृथिवी ति मंत्रं जपेत् । भूतबलिप्रक्षेपमंत्रः । शुनां च पतितानां च श्वपचां पापरोगि
णां । वायसानां कृमीणां च शनकैर्निर्वपेद्भुवि इति । अत्रोक्तमंत्रादि सर्वं पुराणोदितं । देवा मनुष्याः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पशवो वयांसि सिद्धाः यक्षोरगदैत्यसंघाः । प्रेताः पिशाचास्तरवः समस्ता ये चान्नमिच्छन्ति मयात्र दत्तं । पिपीलि
काः कीटपतङ्गकाद्या बुभुक्षिताः कर्मनिबन्धबद्धाः । प्रयान्तु ते तृप्तिमिदं मयान्नं तेभ्यो विसृष्टं सुखिनो भवन्तु ये
षां न माता न पिता न बन्धुः नैवान्नसिद्धिर्न तथान्नमस्ति । तत्तृप्तयेऽन्नं भुवि दत्तमेतत्तेषां सुतृप्तिर्मुदिता भवन्तु ॥ भू
तानि सर्वाणि तथान्नमेतदहं च विष्णुर्न यतोऽन्यदस्ति । तस्मादिदं भूतहिताय भूतमन्नं प्रयच्छामि सुखाय
तेषां । चतुर्दशो भूतगणो य एष तत्र स्थिता येऽखिलभूतसंघाः । तृप्त्यर्थमन्नं हि मया विसृष्टं तेषामिदं ते
मुदिता भवन्तु । इत्युच्चार्य नरो दद्यादन्नं श्रद्धासमन्वितः । भुवि भूतोपकाराय गृही सर्वाश्रयो यतः । इति
तच्च सायं प्रातः कर्तव्यमसुलं । तत्र प्रातः सपत्नीकः । सायमुपवसेत् । यद्यपि तु सर्वमन्त्रकं कर्त्रे भावसत्यपत्नी
सायममन्त्रकं बलिं हरेत् । तथा चोक्तं मनुना । सायं त्वन्नस्य सिद्धस्य पत्न्यमन्त्रं बलिं हरेत् । वैश्वदेवं हि
नामैतत्सायं प्रातर्विधीयते । अतः सायमेव पत्न्या बलिहरणं न पुनर्वैश्वदेवकर्माधिकारः अत्र हि प
त्न्यधिकारः बलिहरणं विश्वदेवस्याङ्गफलहरणं नित्यकं वैश्वदेवकर्मैतत्परः एवं कृतं विश्वदेवस्य बलि
माह । मनुः । शुनां च पतितानां च श्वपचेत्यादि तथा ये भूताः प्रचरन्ति दिवानक्तं बलिमिच्छन्तो वितुदस्य प्रेष्या
तेभ्यो बलिं पुष्टिकामो हरामि मयि पुष्टिं पुष्टिपतिर्दधात्विति । अत्र दिवेति दिने नक्तमिति रात्रौ दिवाचा
रिभ्यो दिवा नक्तंचारिभ्य इति । आश्वलायनस्त्वेतत् ... कर्म हि दिवा दिवा रात्रौ नक्तं नित्यं
धर्मवित्ता वा चेत्स्वात्मना नित्यं कुर्यात् पुनः पुनः । ... वैश्वदेवं बलिं
रात्रौ सायं प्रातः कार्यं पञ्चपञ्चाशत् ... । तदुक्तं जमदग्निना ॥ वैश्वदेवं तथा रात्रौ तु

पाम० १०१

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

योऽट्टलिहन्ति तथा । महान्तः पञ्चयज्ञाख्ये द्विविधे स्याद्धर्मविधिरिति । यस्मात्तेषु सप्तयज्ञेषु नित्यत्वमिति स्मृत्यामपि महायज्ञानां वैश्वदेव
बलिहरणोत्तरभावः । तेषां द्विविधानुष्ठानं विकल्पेन मानमेव दृश्यते । तत्रैककालत्वायोपविधिर्नित्यमाह्नि
कालत्वादिरपि भवतीति सिद्धान्तमर्यादा ॥ वैश्वदेवादि द्विविधा मन्त्राद्यशक्तस्य तु यः स्मार्तहोमकर्ममार्गः सर्वशाखा
धिकरणं न्यायेनैकतन्त्रता एव साधारणं स्वशाखाविधिस्तु कर्म सर्वैरपि तु कार्यं । ग्राह्यस्वार्थे स्वमनावलिपि
त्रिपक्षत्वात । अशक्तो ब्राह्मणो मन्त्रलोपे वैश्वदेवं सर्वनिवृत्त एवं कुर्यात । न शक्तोऽस्ति द्रव्याभाव
दैवत्यनुष्ठेयं ॥ ॥ इति श्रीनृसिंहप्रसादे आह्निकसारे पितृयज्ञमनुष्ययज्ञादि ॥ ॥ अथ भोजनविधिः ॥
तत्र पूर्वमाह ॥ यो वै विन्तजश्चैकं लिप्यापन्नुवः । वा क्षपा हस्तकारस्थिवातेऽप्यहो सिभुंजते इति । तथा म
नुः ॥ भुक्तवत्सु च विप्रेषु स्वेषु भृत्येषु चैव हि । भुञ्जीयातां ततः पश्चादवशिष्टं तु दम्पती ॥ विष्णुपुराणे तु ।
सुवासिनीदुःखितगर्भिणीवृद्धबालकान् । भोजयेत्संस्कृतान्नेन प्रथमं चरमं गृही । अभुक्तवत्सु चैतेषु
भुञ्जन्भुङ्क्ते स दुष्कृतं ॥ मृतश्च गत्वा नरकं श्लेष्मभुग्जायते हि सः ॥ ॥ मार्कण्डेयः ॥ पूजयित्वातिथीन्बा
न्धवान् ज्ञातीन्बन्धूंस्तथार्थिनः । विकलान्बालवृद्धांश्च भोजयेदातुरांस्तथा इति । भोजनसंख्यामाह स्मृतिः । सायं प्रात
र्द्विजातीनामशनं श्रुतिनोदितं । नान्तरा भोजनं कुर्यादग्निहोत्रसमो विधिः । भोजनेतिकर्तव्यतामाह हारीतः । हस्तौ पादौ च प्र
क्षाल्याचम्य प्राङ्मुखो वा उपविश्य भुञ्जीत । बोधायनः । उपलिप्ते समे स्थाने शुचौ श्लक्ष्णसमन्विते । चतुरस्रं त्रिकोणं वा
वर्तुलं चार्धचन्द्रकं । कर्तव्यमानुपूर्व्येण ब्राह्मणादिषु मण्डलं । आदित्या वसवो रुद्रा ब्रह्मा चैव पितामहः । मण्डलान्युप
जीवन्ति तस्मात्कुर्वीत मण्डलमिति । तथा ब्रह्मपुराणे ॥ उपलिप्ते समे स्थाने शुचौ श्लक्ष्णसमन्विते । मण्डलं गोपयेत्स्माद

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

आह्निक

श्री

७०

पवागोहनसमया । अवर्णं स्वः । मनुः कांस्ये हिरण्मये ताम्रे रौप्ये । एतेषु भोजनादि तिदिशपस्य गृहस्थस्य फलं गां सदंतं । मनुः
। नपा हि स्थाविषेष्वां स्येकदा विद्वि भोजनेनानभित्र भांडे भुंजीत न भाव प्रीतिपूर्वि तत्र भित्र भांड निषेधः । ताम्राद्धिय
ति दिक्ष विषयः । तथा वैपेठीनसिः । ताम्ररजतसुवर्णपाशां च श्रुतमश्मस्फटिकानां भिन्न मभिन्नमिति नास्य पात्रं
यत्निविषयं गृहस्थस्य तु विभिद्धत्वा संनयागत्र द्रमनुः ॥ ताम्रपात्रेन भुंजीत भिन्न कांस्ये मलाविडे । पलाशप
प्रपत्रेः प्राहि भुंक्ते हर्षं च सरस्य । पलाशो वह्निः पलाश इति । माघ वां वार्यां स्त्राहे स्य स्य पलाशमात्र भोजनं नि
षेधति । गृहिस्थाति रिक्ते न पलाश भोजनं चांद्रायणफलं लभते । सत्यधर्म सारकाः । व्याख्या सत्वेन मानि
प्रायेतो तिग्रह च व्याविपश्चितः । एकएव तु यो भुंक्ते विप्रलेकांस्य भाजने । चत्वारि तस्य वर्धते आयुः प्रज्ञा यशो
बलं । आसने पादमारोप्य यो भुंक्ते ब्राह्मणः क्वचित् । मुखेन चात्र मश्नाति तुल्यं गोमांस भक्षणं । गवादि
पुवन्मुखेनाश्नातीत्यर्थः । तथाह व्यासः । तथाह व्यासः । पंचार्द्रो भोजनं कुर्यात् प्राङ्मुखो मौनमास्थितः । हस्तौ
पादौ तथैवास्य मेषा पंचार्द्रतामता । तदुक्तमाश्वमेधिके । आर्द्रपादस्तु भुंजीयात् । प्राङ्मुखश्चासने
शुचौ । पादाभ्यां धरणीं स्पृष्ट्वा पादेनैकेन वा पुनः । तच्च भोजनं शुद्धे प्रसन्ने पात्रे कर्तव्यं । प्रथमतः पात्रां तापा
हापैठीनसिः ॥ सौवर्णे राजते ताम्रे पद्मपत्रपलाशयोः । भोजने भोजने चैव त्रिरात्रफलमश्नुते । यतिब्रह्म
चारिणोः पद्मपलाशयोर्भोजने भोवानिषिद्ध भोजने गृहिणां च पद्मपलाशयो र्भोजने सौवर्णादि तत्तैपो
भोजने त्रिरात्रेषेषं द्वं वाव्यात । तत्र पद्मपलाशपत्र भोजनं गृहिव्यतिरिक्तविषयं इति तात्पर्यं । तथाह व्यासः ।
पलाशपद्मपत्रेषु गृही भुक्तें द्वंबोत । ब्रह्मचारियतीनां च चांद्रायणफलं लभेत । इति कांस्यपात्रां गृहीस्यैक एक ७०

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

विवयं यत्पोदतस्त्रिवेधत्व।तांवृत्ला भंजनंवेवकां स्य पात्रेवभोजनं। यतिश्चवस्यापोंच विधवाच विवर्जयेदिति।तथाहारितः। मार्जनार्चनबलिकर्मभोजनाः निचदेवतीर्थेन कुर्यात्।तथा...न पिबेत्व बधुं जीत द्विजः सत्येनपानि...कह स्तेनचजलंभूद्रेणावर्जितं पिवेत्।तद्पात्रे भूमौस्थापनीयं।तदुक्तं...।पंचार्द्रो भोजनं कुर्यात् भूमौ पात्रं विधाय तु।उपवासेन तत्तुल्यं मनुराह प्रजापतिरिति।तच स्थापनं प्राणाहुतिपर्यंतं पश्चात्त्रयं त्रिकालात भोक्तव्यं।तदुक्तं व्यासेन।यत्र पात्रस्य भुंजीत पंचग्रासामहामुने।शेषमुद्धृत्य भोक्तव्यं श्रयतामत्रकारणं।द्विजपादौ वसं स्पर्शः पादचेलरजस्तथा।मुखेनधुक्तेविद्योपिपित्रर्थेन लुप्यते।पितृभोजने भूमिपात्रस्थापनं न लोपनीयमित्यर्थः।उद्धत्य यंत्रादौ पात्रं निक्षिप्येत्यर्थः।पित्रर्थे तु न लुप्यतमिति।चतुर्थेच पाणांतः कचित्।तथा मार्कंडेयः।पादप्रमाणां कृत्वा नच वेष्टितमस्तकः।नाश्नीयात् यद्दर्थे वासाद्ध्ने नाकाशेन च तात स्थितः।शयानः प्रौढपात्रस्तु कृत्वा चैवाव पश्चिकं।पित्रर्थ भोजनेनु भूमिपात्रस्थापनमावश्यकं पित्रर्थेनु न लुप्यत इत्युक्तेः।पादारोपितपादः प्रौढपादः।ब्रह्मपुराणे।पंचग्रासांस्तु भुंजीत च विदेहश्चन निकंके।पात्रमुद्धृत्य शेषं तु भक्षयेत् नकारणं।पित्रकर्मणि।भुंजानो भूमौ पात्रं न चालयेत्।तथा विष्णुः।नभिन्न भाजने नेनोद्येगेन भूमिनपानौ इति उद्वेगे कुर्वीत पर्णिपात्रं स्थापयित्वावशिष्टः सर्वामलं गुलीमिश्रीयात्।पाणिं नचावधुनयात्।यत्र पाणितलेभुंक्ते यः सवा पुंसवनस्मृते।अन्यायौ चोच्छिरेधत्वयोमांसाशनस्मृतं।सवायुषावेपेतं।तथा विष्णुः।नोच्छिष्टो धृतमाददात्।तथाश्वारित्यपुराणे।नोच्छिष्टो याहयेत्।दुध्ने स्थ श्रेष्ठं च सत्यजेत्।भुक्त्वा च जिह्वं नु नाघ्राइं ऽच्छिष्टं दधि।तथानर्मसंध्ययोर्न मध्याह्ने नार्धरात्रेकदाचन।नार्द्रवासा नार्द्रपाणिरामन्वारयज्ञोपवीत्यथा नामयं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

आह्निक प्रातर्द्विजातीनां इति सायंप्रातर्भुजिविधानं । अविदिनग्रहणार्थं । उक्तपात्रविहितमात्रं न मन्त्रं कुर्यात् । तदुक्तं ब्रह्मपुराणे । अत्रे इत्याप्र
७१ णाय्यादो पूर्वाञ्जलिः कथ्यते बुधैः । तत्तत्र समात्रं नित्यमत्वेतदिति मत्वा चापवर्जयेत् ॥ ॥ अथ दिङ्नियमाह ॥ स्मृतिसंग्रहे
71 । आयुष्यं प्राङ्मुखो भुंक्ते यशस्यं दक्षिणामुखः । श्रियं प्रत्यङ्मुखो भुंक्ते ऋतं विद्युदङ्मुखः । ऋतं भुक्त उदङ्मुखः । न
तः अस्यार्थं नित्यमत्वे निष्कामस्य प्राङ्मुखभोजनं विहितं नित्यं तथा इतरानीं काम्यविधयउच्यन्ते । आयुष्यमिति
आयुष्यं आयुषे हितं यशस्यं यशसे हितं । आयुष्कामः प्राङ्मुखः यशःकामो दक्षिणामुख इत्यर्थः । श्रियमिच्छन्
श्रियमिच्छन्नित्यर्थः श्रियै हितं वा श्रियमिति मत्वा इति पाठः । आयुष्यादिवत्तत्र पर्यवसानेऽपरः । श्रियै प्रत्य
ङ्मुखो भुक्त इति । ताद्य्थ्ये चतुर्थी । स्त्रीकामः पश्चिमे भुक्त इति पाठः । ऋतं सत्यं यज्ञफलं स्वर्गः तत्तस्य स्वर्गकामः उद
ङ्मुख इत्यर्थः । अथवा श्रियं चरतमित्यत्र कामयमान इत्यध्याहारेण व्याख्या । क्वचित्तु कदाचिदुदङ्मुख इति पाठ
उदङ्मुखे निषेधः पुत्रवता मैव । तथा च । पुत्रवान् स्यादुदङ्मुखो नित्यं नाश्नीयादित्यर्थः । सोमवारे तथा भं उदङ्मुखे नु स
बुधः नित्यभोजनविषयो वा । शिरो वेष्ट्य च यो भुंक्ते यो भुंक्ते दक्षिणामुखः । इति दक्षिणामुख निषेधो जीवत्मातृ वि
षयः ॥ ॥ स्मृतिसारे ॥ शूद्रपात्रेऽनुसंस्कृतमन्नं मासं दत्तं भार्यादत्तं वा कुशपाणिर्मणिकांचनपाणिर्वा भुंजी
त । असंस्कारदुष्टं क्रियादुष्टं स्वभावदुष्टं विप्रो न घ्राण संस्कारदुष्टं विश्वदेवरहितं क्रियादुष्टं मेवं पर्वकं चत्वारः न्यत्वं वा
स्वभावदुष्टं लशुनादि । न स्त्रिया सह भुंजीत विवाहवर्जं न शिशुभिः सह । पयसि प्रमदाजनेन न भोक्तव्यं ॥ ॥ अथ भोज रा.
नप्रकारः ॥ प्रक्षालितपाणिपादाद्याचम्य शुचौ देशे तत्र दत्ते प्राङ्मुख उपविश्य पञ्च भस्मैव स्वरिति गायत्र्याभ्य ७१
क्ष्य सत्यं त्वर्तेन परिषिंचामि ऋतं त्वा सत्येन परिषिंचामीति प्रदक्षिणमासिंचेत् । इति भागो भूतो चित्रायेदा ।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ह। ऋक्प्राणायस्वाहा। धर्मोऽपानायस्वाहा। इत्यादिभिर्मंत्रैर्वैलिं दद्यात्। ततआपस्तरणमसि स्वाहेति मंत्रेणापः पीत्वामौ
नोविधृतभाजनीयात्। न्यग्व्याहीयपद्मा। तत्रतर्जनीमध्यमांगुष्ठैः प्रथमाहुतिः। मध्यमानामिकांगुष्ठैः द्वितीया।
कनिष्ठानामिकांगुष्ठैस्तृतीया। कनिष्ठातर्जन्यंगुष्ठैश्चतुर्थी।। सर्वांगुलीभिः पंचमीति। एवंप्रजापतिंमनसाध्या
यन्पंचग्रासानुद्धरेत् भक्षयन्। द्विधृत्वा दशनैर्नावनेन। नहिंसोपभुंजीत। तथाहबौधायनः। अवस्थायांप्राणोनवि
ष्टोऽमृतंजुहोमि। शिवोमाविशाप्रदाहाय प्राणायस्वाहा। एवमपानोदानसमानव्यानेष्विति। तथाशौ
नकोऽपि। स्वाहांतः पृथग्वाप्याश्चनाम्नांपंचप्राणपंचक। जिह्वयैः वयंरसंदशनैर्नसंस्पृशेत्। जिह्वाग्रम
नैवकिंचिद्भक्ष्यमश्नीयात्। यथारसंनजानाति जिह्वाग्रेनहुतेन तथा समाहितः कुर्यात्प्राणाहुतिमतंद्रितः।। ।।इति
प्राणाहुतिरंगुलिनियमः।।शौनकोक्तः।। तर्जनीमध्यमांगुष्ठलग्नाप्राणाहुतिर्भवेत्। मध्यमानामिकांगुष्ठे
रपानेजुहुयात्ततः। कनिष्ठानामिकांगुष्ठैर्व्यानेजुहुयात्ततः। तर्जनींतुबहिःकृत्वा तुउदानेजुहुयात्ततः। समाने
सर्वहस्तेन समुदायाहुतिर्भवेत्। इतिपरिषेचनानंतरंभोक्ष्यामि भविष्यतीति विशेषमनुक्तः। भोजनात्किंचिदुद्धृत्य
त्वंधर्मराजायवैवलिं। दद्यात्चित्रगुप्तायप्रेतेभ्यश्चेदमुद्धरेत्। यत्रक्वचनसंस्थानां क्षुत्तृष्णोपहतात्म
नां। प्रेतानांतृप्तयेऽक्षय्यमिदमस्तुयथासुखमिति। गोभिलः अथातः प्राणाहुतिलेपस्योपाकृतिर्भिरि
पक्वाद्यान्नमभिमंत्र्य ऋतंत्वासत्येनपरिषिंचामीतिसायं सत्यंत्वर्तेनपरिषिंचामीतिप्रातः अंतश्चरति
भूतेषुगुहायांविश्वतोमुखः। त्वंयज्ञस्त्वंवषट्कारस्त्वमापोज्योतीरसोऽमृतं। त्वंब्रह्मत्वंप्रजापतिः ब्रह्म
भूर्भुवःस्वरोम् अमृतोपस्तरणमसीत्यपः पीत्वादशाहेलाटं मनसानुस्मृत्वा। प्राणायपंचग्रासानग्न्हि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

आह्निक. पान्।प्राणायस्वाहेतिगार्हपत्यमेवतेनजुहोति।व्यानः। वाहार्यकं व्या० आह० उदा० सभ्यमेवतेनजुहोति।समानायेत्यावसथ्यमेवजु
७२ होति।एतत्पंचमंत्राः प्राणाद्याः तत्रोच्छिष्टतानामिमधुपर्कंच सोमेवन्नमुपानाहुतिमेव।आस्यहोमेषु सर्वे
७२ भुक्तिफलं वै भवति द्विजः।घृतहीनं तु यो भुंक्ते नरः स्वाहाकृतिपंचकं।पश्चाद्धुतेन यो भुंक्ते द्विजस्त्वां दुग्धपाणिं चैर
न्नावह्यपुराणे।हस्तेनलंघयेत्रान्नं मोहेनकदाचन।दंभाद्यो लंघयेत्स्कंतेनान्नं निहतं भवेत्॥विष्णुपुराणे॥
अश्नीयात्तन्मना भूत्वा पूर्वं तु मधुरं रसं।लवणाम्लौ तथा मध्ये कटुतिक्तादिकांस्ततः।प्राग्द्रवं पुरुषोऽश्नी
यान्मध्ये तु कठिनाशनं।अंते पुनर्द्रवाशी तु बलारोग्ये न मुंचति।जठरं पूरयेदर्धं मन्नैर्भागं जलस्य च।वायोः
संचरणार्थं च चतुर्थमवशेषयेत।पंक्तिदेहदूषकतिः।अतिनिरामभक्षितं मधैव स्तौते नसलिलेन च।द्वारे रोध
च यांगोणपंक्तिभेदः सुधैः स्मृतः।आपस्तंबोऽग्रासंख्यामाह॥अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासि
नः।द्वात्रिंशत्तु गृहस्थस्य अमितं ब्रह्मचारिणः।मूलकल्पः।भोजनं तु न निःशेषं कुर्यात्प्राज्ञः कथंचन।अन्य
त्र दधिसक्तुभ्यो घृतपललक्षीरमधुभ्यः।मार्कंडेयः नतकदाचिदुच्छिष्टं प्राजयेत्तत इति।यस्तु पाणितल
लेभुंक्ते यस्तु फूत्कारसंयुतं।प्रसृतांगुलिभिर्यस्तु तस्य गोमांसवच्च तत्।आपस्तंबः नचाश्नीयात्पीतशे
शेषं पिबेत् च।मौनेनैव यस्तु भुंजीत दुःखं हरति मोहतः।सुरापानेन तत्तुल्यमित्येवमनुरब्रवीत।ममिवंधे तु निशिष
मे स्कंपात्रे तेवच।भुक्त्वा योनं विप्रो वै पिबेदन्यत्र वारिणा।शाकमूलफलेक्षूनां दंतच्छेदैर्न भक्षयेत्।बहूनां एम.
भुंजतां मध्ये न चाश्नीयात्त्वरान्वितः।वृथान्नं विकिरेद्धस्ते नोच्छिष्टः कुत्रचिद्व्रजेत।नस्पृशेद्वामहस्तेन भुंजा ७२
नोन्नं कदाचन।नपादेन शिरो वस्ति न पदा भाजनं स्पृशेत्।नोद्धृत्य पिबेदश्नीयात् न बहूनां चैव पश्यतां।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नाश्नीयुर्बहुपङ्क्त्यैवतथानैकस्यपप्पतः नोच्छिष्टोयाहयेदन्नं नचाशिष्टं चसंत्यजेत। अभुक्तावशिष्टंतुनाद्या
द्रोदयित्तं चपीतिति। नार्धरात्रेनमध्याह्ने नाजीर्णेनार्द्रवस्त्रधृक्। नभिन्नभाजनेचैवनभूम्यांनचपाणिषु
।नोच्छिष्टोघृतमादद्यान्नमूर्धानं स्पृशन्नपि। नब्रह्मकीर्तयन्वापि ननिःशेषंनभार्यया। बृहस्पतिः। नपि
बेन्नचभुञ्जीत द्विजः सव्येनपाणिना। नैकहस्तेनचजलं शूद्रेणावर्जितंपिबेत्। पिबतोयस्त्पतेत्तोयं
भाजनेमुखनिःसृतं। अभोज्यं तद्भवेदन्नं भोक्ताभुञ्जीत किल्बिषं। उद्धृत्य वामहस्तेन यस्तोयंपिबतो द्वि
जः। सुरापानेनतत्तुल्यं मनुराह प्रजापतिः। पाणिपात्रे पिबेद्येन तस्मात्त्वं द्विजसत्तमः। अमुष्टिबं
भवेत्यावद्यावद्भूमौ न निक्षिपेत्। गोभिलः। पाणिपिबेद्येन तत्पात्रं द्विजसत्तमः। एकपंक्त्युपविष्टानां
विप्राणां सहभोजने। यद्येकोपि त्यजेत्पात्रं नाश्नीयुरितरेपि तु। मोहाद्भुञ्जीत यस्तत्र स सान्तपनमाच
रेत। व्यासः। स्नात्वावनुणाः शाकिञ्जकनोत्तिः श्रियं हरेत भुञ्जानो मन्त्रसूत्रयुक्तं तस्माज्जोनं त्रिसुपर्णमिति
यज्ञादिः। मौनव्रतं महाकष्टं हुंकारेण विनश्यति। तथापि हि महादोषान्न तस्मान्नियतश्चरेत्।
तैस्तत्काद्धमौनाभिप्रायं एतत् पंचग्रासाः द्वीदिविषयं द्रष्टव्यं। अतिरिच्य भक्षयेद्वि तस्मात्कापत्नीत्रम
कुशायन। पंचग्रासात्महामौनं प्राणाद्याप्यायनं महत्। आश्वमेधिके। मौनीवाप्यथवामौनी प्र
हृष्टः संयतेन्द्रियः। भुञ्जीत विधिवद्विप्रः इति। हस्तदत्तानि चान्नानि प्रत्यक्षं लवणं तथा। मृत्तिकाभक्ष
णाच्चैव गोमांसाशनवत्स्मृतः। लवणं व्यंजनं चैव घृतं तैलं तथैव च। लेह्यं पेयं च विविधं हस्तद
त्तं नभक्षयेत्। अथैकपंक्त्यां नाश्नीयाद्ब्राह्मणः स्वजनैरपि। कोहि जानाति किं कस्य प्रच्छन्नं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

आह्निक
७३
73

पात्रकं भवेत्॥ उदक्याश्चांडालाश्वानकुक्कुटान् ह्यावधं ज्रीत। केशकीटापहतं मुखवातहतं च न भुंजीत। चंडालवायसप्र
त्यानं भोक्तव्यं एकपंक्त्युपविष्टानां दुष्कृतं यदुदाहृतं। आयसपात्रे स्थितं तक्रं मधुमिश्रं तु यद्भवेत्। ताम्रपात्रे स्थि
तं क्षीरं त्रिभिः सर्पिः सुरासमं। सर्वेषां तत्र भेदनात्त्वन्यथा वर्ज्यं पंक्तिर्न भिद्यत इति। अग्निपंक्त्यंतिभिः पंक्तिभेदः।
ततो भोजनांते भुक्तोच्छिष्टं समादाय सर्वेषामानतं किंचिद्दाचमनं। उच्छिष्टभागधेयेभ्यः सोदकं निर्वपेद्भु
वि। अत्र मंत्रः॥ ये वै पुण्यानि लयपथ्यावृद्दनियात्तिनां। प्राणिनां मद्यभूतानां मत्सम्यक् उपतिष्ठतु। ततस्त
प्रः स्वभक्ष्ता पिधानमसीत्यपः प्राश्य तत्रैवाचमेत्। हस्तं प्रक्षाल्याङ्गुष्ठमूर्धपर्यत्यिवे स्थापमेोहितः सोदेवं चे
व पिबेच्च आत्मानमेवं घातयेत्॥ अर्धं पिबेत्तु गंडूषं अर्धं त्यजेत् महीतले। न सा तत्र गता नागालोके न प्रीं
ति निर्मथः। भोजने दंतलग्नेषु जिह्वास्पर्शो ऽशुचिर्भवेत्। परिस्थितेषु वक्तव्यं तत्र निर्गमलेवत शुचिः। पतिस्माग
त्रियाः। यो ऽर्कि कल्पः स्यान चलनात्। प्रक्षालिकाघ इत्येविष्णुर्चिरस्याह॥ ॥अथ भक्ष्याभक्ष्यनिर्णयः॥ यत्रो
विल्वफलपनसंकपित्थधात्रीफलं च वर्जयेत्। सप्तमी रविवारयो र्द्विवारात्राव पि। भोजनेऽश्वलक्ष्मीकः स्या
त्। तिष्यादिषु वर्ज्यं कूष्मांडं तत्र गेत्रागुलकं तु हस्ती अश्रीफलकलिंगाधात्रीवप्रलोपहादिः सप्तस्यं नशिरः फ
पालपन्न नालवर्ज्यमेतिलानप्युक्ष्मा दिषु। अन्नं पर्युषितं भोज्यं चेद्विवासं स्थितमपि स्नेहाक्तं च भवेत्। अस्नेहयुपि
यवगोधूमज्योतिरसविक्रियादीनि पूपसक्तधानाघृतदधिमधुप्रभृतिनिर्लेपभांडस्थितं चेद्दापयान्न मपि भो रा.म०
त.व्यं अस्नेहपक्वं गोधूमविकाराः अपूपाः स्नेहपक्वविकाराः शष्कुली अन्यान्यप्यनिषिद्धानि मासाय ७३
नि सर्वं वावर्ज्यमेव यानि पेयानाम वर्ज्यानि तानि वक्ष्यामः॥ ७॥ इति श्रीमहद्ग्रोनसिंहवाराग्युग

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्तसरोरुहभ्रमरसकलभूमंडलमंडनसमस्तयवनाधीश्वरश्रीनिजामसाहसमस्तसाम्राज्यधुरंधरश्रीमहाराजा
धिराजश्रीदलपतिराजविरचिते श्रीनृसिंहप्रसादे आह्निकसारे भोजनविधिः॥ ॥ अथ तांबूलविधिः॥ ॥
पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसंभवः। चूर्णपर्णं हरत्यायुः शिरा बुद्धिविनाशिनी। पर्णाग्रं पर्णमूलं च
चूर्णपर्णं द्विपत्रकं। इतध्वा वनतांबूलं यस्मान्याधिश्रियं हरेत्। अनिधाय मुखे पर्णं पूगं खादति यो नरः। सप्त
जन्मदरिद्रः स्यादन्ते विष्णुं न स्मरेत्। तर्जन्या चूर्णमादाय तांबूलं न तु खादयेत्। यदि खादयते मूढो रौरवं नरकं
व्रजेत्। कनिष्ठानामिका मध्या तर्जन्यंगुष्ठमंगलं। शोको हानिस्तथा मृत्युरैश्वर्यं सुखी तथा। अंगु
ष्ठचूर्णसंयुक्तं पर्णं चैवानुलेपनं। तत्पर्णं खादयेद्येन सोमपानं दिने दिने। वामहस्तेन खादयेद्दक्षिणहस्तेन
तथैव च। यदि खादयते मूढस्तस्य लक्ष्मीर्विनश्यति। द्विकालं दिवरोग्याही न रात्रौ विना तांबूलमप्यंगाप्र
सारेन खादतं यदि। यावज्जन्म दरिद्रं स भविष्यति न संशयः। प्रातःकाले फलाधिक्यं चूर्णाधिक्यं च मध्यमे।
निशि पर्णाधिकं भक्ष्यं तस्य लक्ष्मीर्विवर्धते। त्रिपत्रं तु नरा तक्षमेकपत्रं तथैव च। षट्पत्रं च प्रसादात् तत्वं
निदानं च प्रयत्नतः। एकापूगं सदा दोषं द्विपूगं निःफलं भवेत्। अतिश्रेष्ठं त्रिपूगं च अधिकं नैव दुष्य
ति। एकाधि त्रि चतुः पंच षड्भिः पूगफलैः क्रमात्। लाभालाभौ सुखं दुःखं आयुर्मरणमेव च॥ ॥ ७॥
इति श्रीमल्लक्ष्मीनृसिंहचरणारविन्दयुगलसरोरुहभ्रमरसकलभूमंडलमंडनसमस्तयवनाधीश्वरश्रीनि
जामसाहसमस्तसाम्राज्यधुरंधरश्रीमन्महाराजाधिराजश्रीदलपतिराजविरचिते श्रीनृसिंहप्र
सादे आह्निकसारे तांबूलविधिः॥ ॥ ७॥ अथ शयनविधिः॥ ॥ पुचोदेशे सर्वजन्मत्वा दिनसंपूज्य

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

आह्निक. मंगल्यं पूर्णकुंभं शिरस्याने निधाय वै शिखां बध्वा मंत्रेण होमं कृत्वा स्नात्वा विजम्बा मंगलधूर्विकृत्वा दक्षिणाशिराः स्वपेत्।
७४ उदकपूर्णं घटं शिरसि गालोपेतः स्वात्माभिनु चिन्तामपहर्तां प्राप्यामधिष्ठाय त्रिकृत्तं जपित्वा विष्णुं नमस्कृत्य
७५ सर्पापसर्पमंत्रं तु ततस्तिलोरणं जपित्वा दृष्टदेवता स्मरणं कृत्वा समाधिमास्थाय यान्यं स्वर्वे हिक्यां मंत्रानाभि
मंत्रं जपित्वा मांगल्यं च सर्वमर्थं विचिन्त्य एवं नु दक्षिणाशिराः स्वपेदिति दक्षिणाशिराः इति प्रदर्शितमार्गेण तथा च
विष्णुपुराणे ॥ प्रागुदक्शिरसं तु संध्यायामथ प्रसिद्धेव स्वपेत् पुंसां विपरीतं तु रोगदमिति। गार्ग्यो
पि। स्वगेहे प्राक्शिराः शेते श्वाशुरे दक्षिणाशिराः। प्रत्यक्शिराः प्रवासे तु न कदाचिदुदक्शिराः। पुराणेपि।
अगस्तिर्माधवश्चैव मुचुकुन्दो महामुनिः कपिलो मुनिरास्तीकः पंचैते सुखशायिनः सुखशायिनोपि
जनैः स्मृतेन दर्शितः।।त्रिस्त्रं जपेत्स्वप्ने सर्वोपद्रवमुक्तसुखशायिनः। नमस्कृत्याव्ययं विष्णुं समाधिस्थः स्व
पेन्निशि इति॥ ॥ शयने वर्जनीयामाह॥ मार्कंडेयपुराणे॥ ॥ शून्यालये श्मशाने च एकवृक्षे चतुष्पथे
महादेवगृहे वापि मातृवेश्मनि न स्वपेत्। न यक्षनागायतने स्कंदस्यायतने तथा। कृतन्तुस्थाप्य च तथा
दुर्भिक्षेणोपघातेषु। न स्वपेत्तु तथा भग्ने शयने नार्द्रवासा कथंचन। धान्यगोविप्रदेवानां गुरूणां च तथोपरि। न चापि भग्न
शयने नाशुचौ अशुचिनाप्यथ। नार्द्रवासा न नग्नश्च नोत्तरापरमस्तकः। नाकाशे सर्वशून्ये च न चैत्यद्रुमे तथा
। विष्णुरपि॥ नार्द्रवासाः स्वपेन्न पलाशशयने न पंचदारुकृते न विक्षतदेशे ना विस्तीर्णे न नग्न मध्ये न त्वा रिपद्धे राम.
न जातु गजकृताशनं सुरगृहं सुपरीणे छिद्रोनो दिवेति विष्णुपुराणेपि। न विशालानां न ते भग्नानामसमानां मलिनां ७४
मपि। न च जन्तुमयां शय्यामधितिष्ठेदनास्तृतामिति। नृशान्त्या। न तेलाभ्यक्तशिराः स्वपेत् नाद्य स्थितः कासमर्थो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

आह्निक० णीतिदृढः ॥ प्रदोषपश्चिमौ यामौ वेदाभ्यासरतो नयेत्। यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पते ति। संध्या
स्नानमित्यादिष्वपोवेवहितशिशादत्संपतनअंपथर्मदभैगाक्रतुफलहृत्या ॥ अस्या माह्निकं संक्षिप्य निरूपितं। एत
७५ स्यकरणे श्रेयः अकरणे प्रत्यवायः ॥ ॥ तदुक्तं कूर्मपुराणे ॥ ॥ इत्येतदखिलं प्रोक्तमहन्यहनि वै मया। ब्रा
ह्मणानां कृत्यजातमपवर्गफलप्रदं। नास्तिक्यादथवालस्याद्ब्राह्मणो न करोति यः। स याति नरकान्घोरा
75 न्काकयोनौ प्रजायते ॥ नान्यो विमुक्तये पंथा मुक्त्वाश्रमविधिं स्वकं। तस्मात्कर्माणि कुर्वीत तुष्टये
परमेष्ठिन इति ॥ ॥ ७ ॥ ॥ ॥ ७ ॥ ॥ इति श्रीमल्लक्ष्मीनृसिंहचरणयुगलसरोरुहभ्रमरस
कलभूमंडलमंडनसमस्तयवनाधीश्वरश्रीनिजामसाहससहमल्लसाम्राज्यधुरंधरश्रीमन्महाराजाधि
राजश्रीदलपतिराजविरचिते श्रीनृसिंहप्रसादे आह्निकसारे शयनविधिः संपूर्णः ॥ १७ ॥ ॥ शुभमस्तु
॥ १७ ॥ ॥ संवत १९२९ समये नाम पोषमासे कृष्णपक्षे ८ दीतवारे शुभं भवतुः ॥ ७ ॥ रामः ॥

राम०
७५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative